राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - 73

Rashtriya Sanskrit Vidyapeetha Series No 73

श्रीस्कान्दपुराणान्तर्गता

सौरसंहिता

SAURASAṂHITĀ

of

Śrī Skānda Purāṇa

Critically Edited by

Prof. U. SHANKARA BHATTA

RASHTRIYA SANSKRIT VIDYAPEETHA

(Deemed University)

TIRUPATI (A.P.)

2000

SAURASAṂHITĀ
Critically Edited by · Prof. **U. Shankara Bhatta**

First Edition · October 2000

Copies : 500

© All rights reserved with the Vidyapeetha

Published by
Prof. D. Prahlada Char
Vice-Chancellor
Rashtriya Sanskrit Vidyapeetha
(Deemed University)
TIRUPATI - 517 507 (A P)

Price Rs [illegible]

Printed at .
Lavanya Mudrana
Bangalore

FOREWORD

It is a matter of great satisfaction that the *Rashtriya Sanskrit Vidyapeetha* (Deemed University) Tirupati, has been able to publish *Saura Samhita*, a part of *Skanda - upapurana* critically edited by Prof. U Shankara Bhatta and presenting the same to the scholarly world interested in the Indological studies and Research

As has been universally acknowledged the *puranas* occupy a very prominent position in the vast literature in Sanskrit. They have been aptly described as the treasure of the great Indian culture and heritage The topics that they deal with are so extensive that they cover almost all the branches of learning both religious and as well secular. The tradition holds that unless one studies the *puranas*, one can not be considered as an eruditer scholar in spite of one's vast knowledge acquired through the studies of all the four *Vedas* along with the ancillary works and also the *Upanishads*

यदि विद्यात् चतुर्वेदान् साङ्गोपनिषदान् द्विजः।
न चेत् पुराणं संविद्यात् नैव स स्याद्विचक्षणः ॥

The present work *Saura Samhita* bears testimony to this view. Though it consists of just 16 chapters, it deals with many significant and interesting issues Being a *Saiva Purana*, in the first 7 chapters it delineats the issues related with *Shiva* and and also various *Saiva rituals* and religious places upholding the supramacy of *Shiva* In the remaining 9 chapters it discusses. The philosophical issues such as the means of *Bramha-Jnana*, the nature of *Siva & Ishwara,* the nature of final release. It also describes the glory of *Bramha Jnana* and *Vijnana*, and many other interesting things It is needless to say that the present work provides ample material for the researchers in the field

This Vidyapeetha which has undertaken the research and publication of rare works related with *Veda, Agama, Jyotisha , Sahitya, Nyaya, Vyakarana* and other systems of traditional learning, as a major project, has already published many rare works and has an ambition of bringing out works

so far unpublished and the publication of *Saura Samhita* is a step in that direction.

Prof U. Shankara Bhatta, editor of the present work was a Professor and Head of the Dept. of *Sahitya* in the *Rashtriya Sanskrit Vidyapeetha* He was an erudite scholar in both *Sahitya* and *Agama* and published many research articles Taking greate pains with the assistance of the scholars of the *Vidyapeetha*, he critically edited the present work collating various manuscripts collected from different oriental libraries Unfortunately this work could not be published while he was alive We take this opportunity to express our deep indebtedness for the valuable services rendered by Prof U Shankara Bhatta.

We also appreciate the proof reading work meticulously carried out by *Dr. Viroopaksha V Jaddipal, Dr. C Ranganathan, and Dr K. Rajagopalan* of the Dept of Research & Publications

Tirupati
25-09-2000

Prof. D. PRAHLADA CHAR

प्रस्तावना

विदितमिदं सर्वेषां विदुषां यद्भारतीयसंस्कृतिनिधेर्वेदस्योपबृंहणाय भगवता व्यासेनोपदिष्टा पौराणिकी विद्या पौराणिकोत्तमेन तत्रभवता सूतेन पुराणोपपुराणैर्जगति सुप्रसारितेति। वेदोपबृंहकाणां भगवद्व्यासप्रणीतत्वेन प्रथितानां ब्राह्म-पाद्म-वैष्णव-शैव-भागवत-भविष्यत्-नारदीय-मार्कण्डेय-आग्नेय-ब्रह्मवैवर्त-लैङ्ग-वाराह-स्कान्द-वामन-कौर्म-मात्स्य-गारुड-ब्रह्माण्ड-संज्ञकानामष्टादशपुराणानां पोषणाय सनत्कुमार-नारसिंह-स्कान्द-शिवधर्म-दुर्वासस्-नारदीय-कापिल-मानव-उशनस्-ब्रह्माण्ड-वारुण-काली-वासिष्ठलिङ्ग-साम्ब-सौर-पाराशर्य-मारीच-भार्गवसंज्ञकान्युपपुराणानि प्रावर्तन्त इति च नाविदितमिदं विदुषाम्।

स्कान्दपुराणम् :-

स्कन्दप्रवक्तृकत्वेन स्कान्दसंज्ञया प्रथितस्यास्य अष्टादशपुराणेषु अष्टादशोपपुराणेषु च परिगणनं ब्रह्माण्डस्येव पुराणान्तरापेक्षया वेदार्थोपबृंहणे वैशिष्ट्यमभिव्यनक्ति। पुराणानां त्रयोदशं स्कान्दपुराणमेकाशीति[1] सहस्रग्रन्थोपेतं माहेश्वर-वैष्णव-ब्राह्म-काशी-अवन्तिका-नागर-प्राभासिकसंज्ञकैः सप्तभिः खण्डैरुपेतं मुद्रापित यद्यप्यत्र क्वचिदुपलभ्यते तथापि उपपुराणानां तृतीयं स्कान्दं [2]लक्षग्रन्थयुतं (I-27) सनत्कुमार-सूत-शाङ्कर-वैष्णव-ब्राह्म-सौरसंज्ञिकाभिः षड्भिः संहिताभिरुपेतमेतावता कालेनामुद्रापितमपि मातृकात्मना प्रथते।

अमुद्रापितस्य स्कान्दोपपुराणस्य सनत्कुमारसहिताद्याः संहिताः तत्र तत्र हस्तलिखित-ग्रन्थालयेषु परमद्योपलभ्यन्ते। तासां संहितानां मातृकारूपाणा सम्यगवेक्षणपुरःसरं नूतनविमर्श-पद्धत्या सस्करणान्युपकल्प्य स्कान्दोपपुराणं सर्वसुलभमुपकल्पयितुं प्रवृत्तेन तिरुपतिकेन्द्रीय-संस्कृतविद्यापीठेन सूचीकटाहन्यायेन प्रथमं प्रकाशनीयत्वेन स्वीकृतां स्कान्दान्तर्गतां सौरसंहिता-मधिकृत्यात्र किञ्चित् प्रस्तूयते -

---

१. द्र. ब्रह्मवैवर्त - श्रीकृष्णजन्मखण्ड - अध्याय १३२.

२. एकाशीतिसहस्रग्रन्थयुतमिति पक्षान्तरम् - द्र. स्कान्दशङ्करसंहिता - हालास्यमाहात्म्य.

सौरसंहिता -

शिवज्ञानकराणामुपपुराणानां तृतीये षट्संहितात्मके पञ्चाशत्खण्डमण्डिते लक्षग्रन्थोपेते स्कान्दे (I-27) षण्णां संहितानामन्त्या सूरेण वेदार्थजिज्ञासवे याज्ञवल्क्याय प्रोक्ता सती सौरसंहितेति प्रथन इति (I-28,29), सौरसंहिता सहस्रग्रन्थेति (I-30) षोडशाध्यायेति (XVI-96) च सौरसंहिता निर्दिशति।

सौरसंहिताप्रतिपाद्यम् -

सर्वविज्ञानसागरा वेदार्थोपपादिका च सौरसंहिता प्रथमाध्याये स्वावतरणक्रमं, द्वितीये तृतीये चाध्याये महादेवप्रभावं, चतुर्थाध्याये जगत्कारणनिर्णयं, पञ्चमाध्याये भस्मत्रिपुण्ड्रधारणादि-महिमानं, षष्ठाध्याये अविमुक्तादिस्थानविशेषमहिमानं, सप्तमाध्याये रुद्रतीर्थादिमहिमानं, अष्टमाध्याये ब्रह्मविद्यामहिमानं, नवमाध्याये विज्ञानमहिमानं, दशमाध्याये ज्ञानोपायं, एकादशाध्याये गुणस्वभावादि, द्वादशाध्याये जीवेश्वरविवेचनं, त्रयोदशाध्याये भोगमोक्षोपायविवेचनं, चतुर्दशाध्याये मुक्तिस्वरूपं, पञ्चदशाध्याये ब्रह्मविद्योपदेशयोग्यायोग्यविवेचनं षोडशाध्याये संहितार्थसङ्क्षेपणं चोपन्यस्यन्ती शिवपारम्यतत्परा महीयते।

अत्र प्रथमे (1-4, 87-91, 99, 101) द्वितीये (18, 20, 21-31, 38-55) चतुर्थे (2, 4-8, 14, 17-23, 25, 27) अष्टमे (9-57) नवमे (3-19) द्वादशे (2-29) चतुर्दशे (2-39) षोडशे (3-35, 58-69) चाध्याये यथासम्भवमुपन्यस्यमाना वेदान्तसिद्धान्ताः संहिताया अस्याः वेदार्थप्रतिपादकत्व समर्थयन्ति।

सौरसहिताया: संस्करणम् -

नूतनविमर्शपद्धतिमवलम्ब्य स्कान्दस्योपपुराणस्य अन्त्यां सौरसंहितां संस्कर्तु प्रवृत्तैरस्माभिः

1. D सङ्केतोपेता (Ms No A 348, Paper - Devanagari- Complete, Oriental Research Institute, Mysore),
2. D1सङ्केतोपेता (Ms No. 3693 (382c), Paper - Devanagari - Complete, India Office Library, London),

3. D2सङ्केतोपेता (Ms No 14515, Paper Devanagari - Complete, Varanasiya Sanskrit Vishvavidyalaya, Varanasi),

4. D3सङ्केतोपेता (Ms. No 15390, Paper - Devanagari - Complete, Varanasiya Sanskrit Vishvavidyalaya, Varanasi),

5. D4सङ्केतोपेता (Ms. No. 5356-A, Paper - Devanagari - Incomplete - Kerala University Manuscripts Library, Trivandrum),

6 D5सङ्केतोपेता (Ts No. 10252, Paper - Devanagari - Complete, TMSSM Library, Tanjore),

7. D6सङ्केतोपेता (Ts. No 10253, Paper - Devanagari - Complete TMSSM Library, Tanjore),

8. Gसङ्केतोपेता (Ms. No. A-452, Paper - Grantha - Complete, Oriental Research Institute, Mysore),

9. G1सङ्केतोपेता (Ms. No 66469 (19 G 68), Palm-leaf - Grantha - Complete, Adyar Library, Adyar),

10. G2सङ्केतोपेता (Ms No. 72556 (28 A 80), Palm-leaf - Grantha - Complete, Adyar Library, Adyar),

11 G3सङ्केतोपेता (Ms No 10203, Palm-leaf - Grantha - Complete, Oriental Research Institute, Baroda),

12 G4सङ्केतोपेता (Ms. No 7130(b), Palm-leaf - Grantha - Complete, Oriental Research Institute, Baroda),

13 G5सङ्केतोपेता (Ms No 9987, Paper - Grantha - Complete, Oriental Research Institute, Baroda),

14 G6सङ्केतोपेता (Ts No 3739c, Paper, Grantha - Complete, Kerala University Manuscripts Library, Trivandrum),

15. G7सङ्केतोपेता (Ts 5711b, Paper - Grantha - Complete, Kerala University Manuscripts Library, Trivandrum),

16. Mसङ्केतोपेता (Ms. No. 5990, Palm-leaf - Malayalam - Complete, Kerala University Manuscripts Library, Trivandrum),

17 M1सङ्केतोपेता (Ms. No. 13749, Palm-leaf - Malayalam - Complete, Oriental Research Institute, Baroda),

18. M2सङ्केतोपेता (Ms No 6924(b), Palm-leaf - Malayalam - Complete, Oriental Research Institute, Baroda),

19 T सङ्केतोपेता (Ms. No 7438, Palm-leaf - Telugu - Complete, Sri Venkatesvara Oriental Research Institute, Tirupati (SVORI),

20 T1सङ्केतोपेता (Ms No 2322, Palm-leaf - Telugu - Incomplete, Government Oriental Manuscripts Library, Madras),

21. T2सङ्केतोपेता (Ms. Paper - Telugu - Incomplete, Hoshiarpur)

इत्येताः एकविंशतिः सौरसंहितामातृकाः सम्यक् परिशीलिताः सन्ति। एतासां Gसङ्केतोपेता मातृका महिनाकात्स्न्यें मातृकान्तराण्यतिशयानात्र नितरामादृतेति, मातृकापाठानां साधुत्वं प्रकरणाद्यनुगुणतया सयुक्तिकं निर्णीतमिति च विदाकुर्वन्तु सुधियः । आदृतपाठमधोऽधः पादटिप्पण्यामस्माभिरनादृताः विविधाः पाठाः, संहितायाः आदौ विषयानुक्रमणिका, अन्ते श्लोकपादसूची चात्र विमर्शपद्धत्यनुरोधेनोपकल्पिता गवेषकाणां विमर्शकाना च स्यान्महते प्रयोजनायेति विश्वसिति नश्चेतः।

तिरुपतिकेन्द्रीयसस्कृतविद्यापीठेन प्रकाशनीयग्रन्थान्तर्गततया अङ्गीकृतायाः स्कान्दान्तर्गतायाः सौरसंहितायाः सम्पादनकार्यं क्रिस्तूत्तरषट्षष्टयुत्तरनवशताधिकैकसहस्रतमे (1966 A D)वत्सरे विद्यापीठस्य अनुसन्धानप्रकाशनविभागस्य विद्वद्भिः प्रारब्धं तदानीमुपलभ्यमानानामेकविंशतिमातृकाणां पाठपरिशीलनादिकमेकेनैव वत्सरेणातिक्रम्य संस्करणस्तरमुपगतं सत् केनापि बलीयसा विघ्नेन प्रतिहतमपि कालानुकूल्येन सप्ताशीत्यधिकनवशतोत्तरैकसहस्रतमे

क्रिस्तुवत्सरे (1987 A D) पुनः प्रारब्धमद्य परिपूर्णं सत् वाचकानामुपयोगाय संनद्धमास्त इत्येतत् परं प्रमोदस्थानम् ।

कृतज्ञताविष्करणम् -

स्कान्दान्तर्गतायाः सौरसंहितायाः प्रकाशने अपेक्षितानां विविधहस्तलिखितग्रन्थालयगतानां मातृकाणां प्रापणं व्यवस्थाप्य विद्यापीठस्य तदानीन्तननिदेशकाः प्रथितयशसस्तत्रभवन्तः डा. बे. रामचन्द्रशर्माणः, मातृकाणां प्रतिलिपिकरणादिकार्यजातं पर्यवेक्ष्य अनुसन्धानप्रकाशनविभागस्य तदानीन्तनव्याख्यातारः श्रीमन्तः वि. स्वामिनाथन् महोदयाः, मातृकाणां प्रतिलिपिकरणं पाठभेदसङ्कलनं च विधाय अनुसन्धानप्रकाशविभागस्य तदानीन्तनानुसन्धानसहकर्तारः अस्मदविनाभूताः श्रीमन्तः लक्ष्मीनरसिंहभट्ट-राघवप्रसादचौधरी-रामानुजतातार्यमहाभागाश्च भृशमुपाकार्षुः । एभ्यः सर्वेभ्यः हार्दं कार्तज्ञ्यमत्रावेदयामः । एतदतिरिक्ततया सौरसंहितान्तर्गतानां वेदान्तादितत्त्वानां विवेचने अस्मानुपकृतवद्भ्यः श्रीमद्भ्यः एम्.एल्. नरसिंहमूर्तिमहाशयेभ्यः, श्लोकपादानुक्रमणिकायाः परीक्षणे सहकृतवद्भ्यः डा. एस्. सुदर्शनशर्ममहोदयेभ्यश्च कृतज्ञतां व्याहरामः । सौरसंहितासस्करणमेतत् सज्जीकर्तुं प्रवृत्तानस्मान् स्वस्वसौरसंहितामातृकाः प्रदायात्यन्तमुपकृतवद्भ्यः उपर्युक्तविविधहस्तलिखितग्रन्थालयाधिकृतेभ्यः कृतज्ञतामवसरेऽस्मिन् प्रकाशयामः ।

प्रकाशनीयत्वेन सङ्कल्पितायाः केनापि कारणेन अवरुद्धप्रकाशनायाः स्कान्दान्तर्गत-सौरसंहितायाः संस्करणे अस्मान् नियोजितवद्भ्यः तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठस्य तदानीन्तन-कार्यनिर्वाहकप्राचार्येभ्यः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्वविद्यालयस्य प्रथम-कुलपतिभ्यस्तत्रभवद्भ्यः डा. एन्.एस्. रामानुजतातार्येभ्यः स्वाधमर्ण्यमावेदयन्तो वय सौरसंहितायाः विद्वद्दादरणीयतामाशास्महे । इति शम् ॥

उण्डेमने शङ्करभट्टः

विषयानुक्रमणिका

Vice-Chancellor's Foreword	iii
सम्पादकस्य प्रस्तावना	v-ix
विषयानुक्रमणिका	x-xxvi
सौरसंहिता	१-२७५
पादानुक्रमणिका	२७६-४०७

★★★

अध्यायः	विषयः	श्लोकसङ्ख्या
१.	सौरसंहितावतरणम्	१-११४
	शिवमहिमानुवर्णनपरं मङ्गलाचरणम्	१-८
	जगदभिवृद्ध्यर्थपुराणप्रवचनविषयकव्यासप्रतिज्ञा	९
	पौराणिकोत्तमसूतमहिमानुवर्णनम्	१०-१२
	सूतसंनिधौ वालखिल्यकृतं पुराणविद्योपदेशाभ्यर्थनम्	१३-१५
	सूतेन वालखिल्येभ्यः पुराणविद्योपदेशारम्भः	१६
	सूतेन ब्राह्मादिब्रह्माण्डान्तानाम् अष्टादशपुराणानामनुक्रमणम्	१७-१९
	अष्टादशपुराणातिरिक्तानां सनत्कुमारादिभार्गवान्तानाम् अष्टादशोपपुराणानामनुक्रमणम्	१९-२६
	उपपुराणानां शिवज्ञानकरणत्वम्	२६
	उपपुराणस्य स्कान्दस्य ग्रन्थ-संहिता-खण्डसङ्ख्यानिर्देशः	२७
	उपपुराणे स्कान्दे अन्त्यायाः संहितायाः सौरसंहितासंज्ञायामौचित्यम्; सौरसंहितायाः ग्रन्थपरिमितिः, प्राशस्त्यं च	२८-३०
	प्राधान्येन महादेवस्य, तच्छेषत्वेन रुद्रादीनां च प्रतिपादने पुराणानां तात्पर्यम्	३१-३५
	अष्टादशपुराणानां सत्यवतीसुतकर्तृकत्वं सूतप्रवक्तृकत्वं च	३६
	पुराणानां वेदार्थोपबृंहणपरतायाः समर्थनम्	३७-३९
	पुराणादिषु सम्भाव्यमानानां वेदविरुद्धांशानां परित्याज्यत्वम्	३९-४२
	प्राधान्येन पुराणेषु प्रतिपाद्यानां निर्देशः	४२-४४
	वेदानां ब्राह्मणानां च वैभवस्य रुद्रप्रसादमात्रावगम्यत्वम्	४४-४८
	ब्राह्मणानां पूज्यत्वस्य सहेतुकं समर्थनम्	४९-५२
	वेदार्थज्ञानाय शिवस्य अर्चनीयत्वम्	५२-५४

शिवानुग्रहकामस्य व्यासस्य मेरुशिखरे तपश्चरणम्,
तपसा व्यासेन शिवसाक्षात्करणम्,
शिवानुगृहीतेन व्यासेन वेदार्थावगमनम्,
व्यासेन चतुर्धा वेदविभजनम्, तत्र ऋग्वेदस्य
एकविंशतिधा, यजुर्वेदस्य शतधा, सामवेदस्य सहस्रधा,
अथर्ववेदस्य नवधा च विभजनम् ५४-६२
व्यासेन ऋग्वेदादिवेदानां प्रवचनाय सुमन्तुप्रभृतीनां
वेदपारगाणां चतुर्णां शिष्याणां, ऋग्वेदादिवेदशाखानां
श्रावणाय तत्तद्वेदशाखासङ्ख्यानुरोधेन मुनीनां च ग्रहणम्,
वेदानां वेदशाखानां च प्रवचने श्रावणे च शिष्याणां मुनीनां च
पार्थक्येन व्यवस्थापनं च ६२-६९
वेदप्रवक्तॄणां वेदशाखाश्रावकाणां च मुनीनां स्वभावादिवर्णनम् ६९-८०
व्यासं प्रति सर्ववेदान्तप्रतिपाद्यवस्तुतल्लक्षणादिजिज्ञासूनां
वेदतच्छाखाश्रावकाणां मुनीनां प्रश्नाः ८१-८५
**व्यासकृतस्य सर्ववेदान्तप्रतिपाद्यवस्त्वादिविषयकप्रश्नसमाधानस्य
सूतेन अनुवादः** ८६-१०५
सर्ववेदान्तानां शिवस्वरूपप्रतिपादनपरत्व,
शिवस्य सत्यविज्ञानसुखानन्दैकरूपत्वं च ८७
शिवस्य असाधारणानि नामानि ८८,८९
प्रत्यग्ब्रह्मैकताकारविज्ञानस्य वेदान्तमात्रजन्यत्वं, मुक्तिहेतुत्वं,
शमादिपराङ्गोपेतत्वं च ८९,९०
विज्ञाने सर्वकर्मपर्यवसानस्य कथनम् ९१
पाशुपतव्रतस्य महिमानुवर्णनम् ९१,९२
ब्राह्मणस्येतरस्य च धर्माधर्मविवेचनम् ९२,९३
चोदनालक्षणस्य धर्मस्य प्रमाणत्वम् ९४-९८
वेदोक्तकर्मभागस्य वेदसाध्यधर्मादिगोचरत्वम् ९८
वेदान्तानां परब्रह्मैकविषयत्वम् ९९
वेदस्य पुरुषार्थतात्पर्यस्य विवेचनम् १००

	पुरुषार्थस्य ब्रह्मविज्ञानशेषतायाः समर्थनम्	१०१,१०२
	शेषिणः परब्रह्मणो वेदार्थत्वम्	१०३
	परमेश्वरस्य वेदव्यञ्जकत्वं चोदनामानत्व च	१०४,१०५
	सर्ववेदान्तप्रतिपाद्यादिकमुपदिश्य व्यासस्य कैलासं प्रति गमनम्	१०६
	सर्वशास्त्रप्रवर्तकमुनिकर्तृकम् आस्तिकोत्तमवेदाध्यापनम्	१०७,१०८
	वेदाध्ययनस्य शुद्धविज्ञानहेतुत्वं, शुद्धविज्ञानस्यैव ज्ञानत्वं च	१०८,१०९
	वेदविज्ञानलाभार्थकपुराणाभ्यासस्य करणीयत्वम्	११०
	पुराणलक्षणनिर्देशः	१११
	स्कान्दपुराणस्य नित्यमभ्यसनीयत्वं, स्कान्दपुराणाभ्यासफलं च	११२
	सौरसंहितायाः नित्यमभ्यसनीयत्वं, सौरसंहिताभ्यासश्रावणयोः फलं च	११३,११४
२.	**महादेवप्रभाववर्णनम्**	१-१३०
	योगीश्वरयाज्ञवल्क्यकर्तृकवेदार्थप्राप्तिवृत्तान्तविषयकः वालखिल्यानां प्रश्नः	१
	सूतेन याज्ञवल्क्यकर्तृकवेदार्थप्राप्तिवृत्तान्तकथनम्	२-१७
	लोकहितकामनया याज्ञवल्क्येन गायत्रीजपेन सूर्यस्य प्रसादनम्	२-५
	याज्ञवल्क्यस्य पुरः सूर्यस्याविर्भावः	६
	याज्ञवल्क्यकृता सूर्यस्तुतिः	७-१५
	याज्ञवल्क्याय सूर्यकर्तृकसर्ववेदार्थप्रवचनस्य सूतेन विवरणम्	१६-१३०
	सर्ववेदार्थमधिकृत्य सूर्यं प्रति याज्ञवल्क्यस्य प्रश्नः, सूर्येण याज्ञवल्क्य प्रति सर्ववेदार्थप्रवचनं च	१६,१७
	वेदार्थज्ञानस्य अज्ञाननाशकत्वम्	१८,१९
	आत्मनः चिद्रूपत्वस्वप्रकाशत्वे, आत्मभेदज्ञानस्य व्यावहारिकत्वं च	१९,२०
	अज्ञानस्वरूपम्	२०,२१
	तत्त्वभेदस्य अज्ञानविजृम्भितत्वम्	२२-३१
	वेदविरुद्धार्थवादिनां तार्किकाणां वादानां परिहरणीयत्वम्	३२-३३
	सर्ववेदान्तप्रतिपाद्यतत्त्वस्य परमतत्त्वत्वं, तस्यैव मायया भिन्नस्य जगदात्मना विभानम्	३४,३५
	मायाशक्तेः परात्मनः आकाराणां बहुविधत्वम्	३६,३७
	जगद्विवर्तनकारणस्य परात्मन आकारस्य सत्त्वादिगुणाकारैस्त्रिविधत्वम्	३८

सत्त्वादिगुणत्रयवशाद्रुद्रादीनां सम्भवस्य विवेचनम्	३९-४१
रुद्रादिभिर्हर्यादिसृष्टेः प्रकारः	४२-४४
लोकोपकाराय स्वांशेन ब्रह्मविष्ण्वादिरूपेण रुद्रस्यावस्थितिः	४५
विष्णुब्रह्मणोः रुद्राज्ञानुवर्तित्वम्	४६-४८
रुद्रस्य शिवाज्ञानुवर्तित्वम्	४९
हरिब्रह्मापेक्षया शिवस्य प्रकृष्टत्वम्	५०-६४
शिवेन प्रेरितानामेव ब्रह्मादीनां सृष्ट्यादौ प्रवृत्तेः कथनम्	६४-६६
शिवकर्तृकायाः भूतसृष्टेः प्रकारः	६७,६८
शब्दादिविषयेषु देवतांशसम्भवस्य विवरणम्	६९-७१
रुद्रकर्तृकसृष्टिप्रक्रियाविवरणम्	७१-१२१
रुद्रसृष्टौ रुद्राण्डसृष्टिः	७२-७३
रुद्रसृष्टौ रुद्राण्डे विष्णूत्पत्तिः	७३
नारायणशब्दनिर्वचनम्	७४,७५
विष्णोर्जनार्दनादिसंज्ञाविशेषाः	७६-७८
विष्णुना विराजः इन्द्रियादीना च सृष्टिः	७८-८२
महाभूतेभ्यो ब्रह्माण्डस्य उत्पत्तेरभिवृद्धेश्च कथनम्	८३-८५
ब्रह्माण्डावच्छिन्नभूतेभ्यश्चतुर्दशलोकोत्पत्तिः	८५,८६
महातलादिपाताललोकानां वर्णनम्	८७-८९
रौरवादिनरकलोकवर्णनम्	९०
पातालानामधस्थाज्जगदाधारस्य शेषस्यावस्थितेः, शेषस्य कालाग्न्याश्रितत्वस्य च कथनम्	९१
भुवोलोकादिलोकानामुत्पत्तेः प्रकारः	९२,९३
भूलोके जम्बूद्वीपादिद्वीपानां परिगणनम्	९३-९५
जम्बूद्वीपस्य वैशिष्ट्यम्	९५,९६
जम्बूद्वीपादिद्वीपानावृत्य तिष्ठतां क्षारोदादीनां सप्तसागराणां परिगणनम्	९६-९८
ससमुद्रायाः धरायाः विस्तारः	९८
जम्बूद्वीपमध्यगतस्य महामेरुपर्वतस्य उच्छ्रयादिकीर्तनम्	९९-१०१
मेरुपर्वतस्योत्तरे तिष्ठतां हिमवदादिवर्षपर्वतानां परिगणनम्	१०२,१०३
पुष्करादिद्वीपेषु महापीतादीनां षट्चत्वारिंशद्वर्षाणां परिगणनम्	१०३-११४

	जम्बूद्वीपाधिपानां वैशिष्ट्यस्य कीर्तनम्	११५-१२१
	संसारसागरोत्तरणार्थं हरपूजनविधानम्	१२२
	मेरोरुपरि महापुर्या चतुराननावस्थितिः	१२३
	कैलासशिखरे ब्रह्मनारायणादिभिरुपास्यमानस्य महेश्वरस्यावस्थितिः	१२४-१२८
	त्र्याम्रपुरे देव्याः संनिधौ भगवतो रुद्रस्य सन्ध्यासु नर्तनं तद्वैशिष्ट्यं च	१२९,१३०
३.	**महादेवप्रभाववर्णनम्**	१-७४
	लोकविस्तारकथनविषयकसूतप्रतिज्ञा	१
	सङ्ग्रहेण भूलोकादिविस्तारकथनम्	२-२१
	भूलोकस्य परिमितिः	२
	भूलोकवासिषु पार्थिवांशबाहुल्यम्	३
	भुवो लोकस्य परिमितिः	४
	भुवो लोकवासिषु अवंशबाहुल्यम्	५
	स्वर्लोकस्य परिमितिः	६
	स्वर्लोके आवहादीनां वायुनेमीनां परिगणनम्	७-९
	स्वर्लोके सूर्यमण्डलस्य स्थानम्	९
	स्वर्लोके चन्द्रनक्षत्रमण्डलयोः स्थानम्	१०
	स्वर्लोके ग्रहमण्डलस्य सप्तर्षिमण्डलस्य च स्थानम्	११
	स्वर्लोके ध्रुवस्य स्थानं विस्तारः स्वरूपं च	१२,१३
	सूर्यमण्डलस्य विस्तारः	१३,१४
	चन्द्रमण्डलस्य विस्तारः	१४
	ग्रहमण्डले भार्गवस्य बृहस्पतेश्च विस्तारः	१५
	ग्रहमण्डले शनिकुजयोः विस्तारः	१६
	भुवनत्रयस्य सूर्यकिरणपूरितत्वम्, अपरिभाष्यविस्तारत्वं च	१६-१८
	महोलोकस्य स्थानं, विस्तारः निवासिनश्च	१८,१९
	जनलोकस्य विस्तारः निवासिनश्च	१९,२०
	तपोलोकस्य विस्तारः निवासिनश्च	२०,२१
	सत्यलोकस्य विस्तारः	२१
	सत्यलोकस्यैव ब्रह्मलोकत्वम्,	

	तत्र ब्रह्मणः योगिनां नारायणभवनस्य चावस्थितिः	२२,२३
	सत्यलोके विष्णुलोकस्यावस्थितेः, विष्णुलोके हरेः शयनस्य, विष्णुलोकवैशिष्ट्यस्य च कथनम्	२४-२५
	भवभवनस्थानम्, भवभवनवैशिष्ट्यम्, भवभवनस्थानस्यैव रुद्रलोकत्वं च	२५-२९
	रुद्रलोके प्रणवाद्यभिमानिनीभिः देवताभिः शङ्करस्योपासनम्	२९,३०
	प्रणवाद्यभिमानिनीनां देवतानां स्वरूपवर्णनम्	३०-३५
	प्रणवाभिमानिन्याः देवतायाः स्वरूपम्	३०,३१
	व्याहृत्यभिमानिन्याः देवतायाः स्वरूपम्	३२
	सावित्र्यभिमानिन्याः देवतायाः स्वरूपम्	३३,३४
	प्रणवव्याहृतिसावित्र्यतिरिक्तानां वैदिकमन्त्राभिमानिनीना देवतानां स्वरूपम्	३४,३५
	रुद्रलोके ब्रह्मादिकर्तृकशङ्करोपासनप्रकारः	३६
	रुद्रलोकगमने अर्हाणामनर्हाणां च कीर्तनम्	३७,३८
	वैदिकानां तान्त्रिकाणां चानुग्रहे शिवविष्ण्वादिदेवानां विभिन्नमूर्तिग्रहणम्	३९-४२
	महेश्वरपारम्यकथनपूर्वकं महेश्वरध्यानपूजनादिविधानम्	४३-७३
	महेश्वरपारम्यकथनम्	४३-५२
	महेश्वरध्यानपूजनविधानम्	५२-५४
	प्रणवस्य वर्णप्रकाशकत्वम्	५५
	बिन्दोः सर्वप्रकाशकत्वं नादप्रकाश्यत्व नादस्य परमात्मप्रकाश्यत्व च	५६
	वर्णरूपिण्याः प्रणवात्मिकायाः मातृकायाः परमात्मप्रकाश्यत्वम्	५७
	प्रणवस्य प्राशस्त्यम्	५८-६०
	महेश्वरस्य महिमा जिज्ञास्यत्वं च	६१,६२
	अनन्यभक्त्या महेश्वरस्यैव ध्येयत्वम्	६३-६५
	महेश्वरातिरिक्तानामशिवत्वं महेश्वरज्ञानस्य मोक्षप्रदत्वं च	६५-६७
	महेश्वरज्ञानसिद्ध्यर्थकशिवध्यानप्रकारः	-६८-७३
	शिवज्ञानस्य मुक्तिहेतुत्वं, कर्मणः शिवज्ञानहेतुत्वं च	७३,७४
४.	**जगत्कारणनिर्णयः**	१-५९
	जगत्कारणनिर्णयप्रवचनविषयकसूत्रप्रतिज्ञा	१

	ब्रह्मातिरिक्तस्य जगत्कारणत्वं निषिध्य ब्रह्मण एव जगत्कारणत्वस्य प्रख्यापनम्	२
	जगत्कारणविषयका विविधाः प्रवादाः	३-८
	जगत्कारणस्यतर्का गम्यत्वम्	९-१२
	वेदानुसारितर्कादीनां वेदार्थवेदकत्वम्	१३
	अतीन्द्रियार्थविज्ञानस्य वेदमात्रजन्यत्वम्	१४
	वेदान्तानुसारेण ब्रह्मण एव जगत्कारणत्वम्	१५
	जगत्कारणस्य ब्रह्मणः सच्चित्सुखानन्दादिरूपत्वस्य समर्थनम्	१६,१७
	ब्रह्मणोऽन्यस्य सत्यत्वस्य निरसनम्	१७,१८
	ब्रह्मणोऽभिन्नशक्तेः ब्रह्मानतिरिक्तत्वस्य समर्थनम्	१८,१९
	वेदसिद्धान्ताद्बाह्यानां सिद्धान्तानां सिद्धान्तत्वस्य निरसनम्	२०,२१
	ब्रह्मणः कारणत्वनिर्वाहिकायाः शक्तेर्मायात्वं सदसद्रूपतोऽनिरूप्यत्वं च	२१,२२
	मायायाः जीवनजगद्धेतुत्वस्य समर्थनम्	२२-२४
	कार्यरूपस्य जगतः सत्यत्वनिरसनमनृतत्वसमर्थनं च	२४-२६
	अद्वैतस्य सर्वोपनिषदर्थत्व सृष्टेः मायामयत्वं च	२७
	पुराणेषूपवर्ण्यमानायाः सृष्टेर्वेदाननुसारिता साङ्ख्याद्यनुसारिता च	२८,२९
	श्रुत्यनुसारिण्याः सृष्टिप्रक्रियायाः भारतधर्मशास्त्रयोरुपवर्ण्यमानता	३०,३१
	वेदानुसारिण्याः त्रिमूर्तिसृष्टिप्रक्रियायाः कथनम्	३१-३८
	ब्रह्मकारणवादस्य प्राशस्त्यं तद्भिन्नकारणवादानां मृषावादत्वं च	३९-४०
	ब्रह्मकारणवादमभ्युपगच्छतामनभ्युपगच्छतां च विवेचनम्	४०-४३
	अर्हदादितन्त्राणां तदुपदिष्टानामाचाराणां च परित्याज्यत्वम्	४४-४८
	वेदससिद्धानामाचाराणां ग्राह्यत्वं फलं च	४८,४९
	वेदमहिमानुवर्णनम्	४९,५०
	वेदमार्गसमाश्रयणस्य पुरुषार्थसाधकत्वं करणीयत्वं च	५१-५९
५.	**भस्मत्रिपुण्ड्रधारणादिमहिमानुवर्णनम्**	१-२४
	समस्तपापशुद्धिहेतुप्रवचनविषयकसूत्रप्रतिज्ञा	१
	भस्मत्रिपुण्ड्रधारणस्य वर्णाश्रमपरिभ्रंशादिपापनिवारणसामर्थ्यस्य कीर्तनम्	२-१६
	त्रिपुण्ड्रधारिणे भिक्षाप्रदानस्य सर्वपापनिवारणहेतुत्वम्	१७
	त्रिपुण्ड्रधारिणः पादप्रक्षालनस्य सर्वपापनिवारणहेतुत्वम्	१८

रुद्राक्षधारिब्राह्मणभोजनस्य सर्वपापनिवारणहेतुत्वम् १९
वेदमार्गानुसारिरुद्रलिङ्गार्चनस्य सर्वपापनिवारणहेतुत्वम् २०
भस्मसञ्छन्नसर्वाङ्गानुगमनस्य सर्वपापनिवारणहेतुत्वम् २१
भस्मसञ्छन्नसर्वाङ्गप्रस्तुतेः सर्वपापनिवारणहेतुत्वम् २२
भस्मसञ्छन्नदेहप्रणामस्य सर्वपापनिवारणहेतुत्वम् २३
शिवधर्मपराणतायाः सर्वपातकनिवारणहेतुत्वम् २४

अविमुक्तादिस्थानविशेषमहिमानुवर्णनम् १-५२
सर्वपापशुद्धिहेतुप्रवचनविषयकसूप्रतिज्ञा १
ईश्वरं प्रति पापशुद्धिहेतुकथनविषयिणी देव्याः प्रार्थना २,३
ईश्वरेण देवीं प्रति पापशुद्धिहेतुविवरणम् ४,४६
सर्ववेदान्तदर्शितपापशुद्धिहेतुकथनविषयिणी ईश्वरस्य प्रतिज्ञा ४,५
सर्वपापशोधकस्य अविमुक्तसंज्ञकस्य स्थानस्य महिमानुवर्णनम् ६-१७
सर्वपापशोधकस्य व्याघ्रपुरसंज्ञकस्य महास्थानस्य महिमानुवर्णनम् १८-४६
व्याघ्रपुरमहिमानुवर्णनात् परं शिवेन कृतस्य नर्तनस्य सूरकृतं वर्णनम् ४७-५२
व्याघ्रपुरमहिमानुवर्णनं कृतवतः शिवस्य नर्तनम् ४७
शिवस्य नर्तनं दृष्ट्वा शिवायाः करतालकरणम् ४८
नृत्यन्महादेवस्य शिवायाश्च ध्यानस्य फलम् ४९
अभ्रसभायां नृत्यतः परमेश्वरस्य दर्शनस्य फलम् ५०,५१
सहेतुकं व्याघ्रपुरस्य गमनयोग्यत्वस्य कथनम् ५१,५२

रुद्रतीर्थादितीर्थमहिमानुवर्णनम् १-४४
सर्वपापशुद्धिहेतुकथनविषयकसूप्रतिज्ञा १
तीर्थसेवादीनां सर्वपापविशोधकत्वम् २
स्वर्गान्तरिक्षभूमिगततीर्थकथनविषयकप्रतिज्ञा ३
स्वर्गलोकगतानां रुद्रतीर्थादितीर्थाना परिगणनम् ४-१०
अन्तरिक्षेऽपि रुद्रतीर्थादितीर्थाना सत्तायाः कथनम् ११
भूलोकगतानां प्रयागादितीर्थाना परिगणनम् ११-२४
गोदावर्यादिनदीनां महिमानुवर्णनम् २५-३०
गन्धमादनवेदतीर्थसंज्ञकयोस्तीर्थयोर्महिमानुवर्णनम् ३०,३१

	कृतमालाख्यनदीस्नानादिफलम्	३१-३३
	तीर्थमेवनस्य करणीयत्वम्	३३,३४
	गोदावरीस्नानविशेषफलम्	३४,३५
	कृष्णवेणीस्नानविशेषफलम्	३५,३६
	सुवर्णमुखरीस्नानविशेषफलम्	३६,३७
	कावेरीस्नानविशेषफलम्	३७-३९
	गन्धमादनतीर्थस्नानविशेषफलम्	३९,४०
	वेदारण्यस्नानविशेषफलम्	४०-४२
	देव्यै शिवेन सेवनीयत्वेन कथितानां तीर्थानां सेवनीयत्वस्य सूतेन पुनःकथनम्	४२-४४
८.	**ब्रह्मविद्यामहिमानुवर्णनम्**	१-५७
	सर्वपापशुद्धिहेतुप्रवचनविषयकसूत्रप्रतिज्ञा	१
	अज्ञानस्य अशुद्धिहेतुतायाः विज्ञानस्य विशुद्धिहेतुतायाश्च कथनम्	२
	अज्ञानस्य जगत्प्रतिभासकत्वं विश्वजगद्भानस्य अशुद्धिहेतुत्वं च	३
	जगद्भानप्रकारः, पुण्यपापयोः सुखदुःखहेतुत्वं च	४
	रागद्वेषोत्पत्तौ कारणम्	५
	विधिनिषेधप्रवृत्तेः रागद्वेषपूर्वकत्वम्	६
	विहितनिषिद्धयोः पुण्यपापहेतुत्वम्	७
	विहिताकरणस्य पापहेतुत्वम्, अपूर्वस्य फलपर्यन्तवृत्तित्वं च	८
	अन्तर्यामिनः ईश्वरस्य धर्माधर्मफलप्रदत्वस्य निरूपणम्	९-१९
	साम्बस्य शिवस्य सत्यत्वं, द्वैतरूपस्य वस्तुनः अज्ञानविजृम्भितत्व च	२०,२१
	मायास्वरूपनिरूपणम्	२१-२५
	शुक्तिरजतस्य मायाकार्यत्वम्	२६
	विज्ञानवादिबौद्धमतनिराकरणम्	२७-३१
	घटादिज्ञानबाधस्य शुक्तिकारूप्यज्ञानबाधाद्वैलक्षण्यम्	३२-३५
	व्यावहारिकप्रातिभासिकसत्तयोर्निरूपणम्	३६-४८
	बौद्धमतनिराकरणपूर्वक व्यावहारिकसत्तानिरूपणम्	३६-४३
	सदृष्टान्तं प्रातिभासिकसत्तानिरूपणम्	४४-४८
	तुच्छात् प्रातिभासिकस्य वैलक्षण्यं मायामयत्वं च	४९,५०

	आत्माशुद्धिविशुद्धिहेतुनिर्देशः	५१
	वेदान्तविज्ञानस्य अशुद्धिनिवर्तकत्वम्, आत्मशुद्धिहेतुत्वं च	५२
	आत्मस्वरूपनिरूपणम्	५३
	ब्रह्मात्मनोरभेदः, ब्रह्मात्मनोर्भेदस्य औपाधिकत्वं, जीवत्वस्य व्यावहारिकत्वं च	५४
	जीवस्य मुक्तौ विज्ञानस्य हेतुत्वम्	५५
	वेदान्तश्रवणस्य पापमोचकत्वम्	५६
	ब्रह्मविद्यायाः महत्तरपापशुद्धिहेतुत्वम्	५७
९.	**विज्ञानमहिमानुवर्णनम्**	१-५०
	विज्ञानमाहात्म्यप्रवचनविषयकसूत्रप्रतिज्ञा	१
	विज्ञानस्य स्वरूपम्, ब्रह्मैकविषयधर्मैकविषयभेदेन विज्ञानस्य द्विविधत्वं च	२,३
	धर्मैकविषयविज्ञानस्य ब्रह्मैकविषयकविज्ञानशेषत्वमस्वतन्त्रत्वं च	३,४
	धर्मस्य पुरुषार्थत्वसमर्थनम्	४-८
	ब्रह्मविज्ञानस्य वेदमानैकजन्यत्वम्	९
	वेदान्तविज्ञानस्य मुक्तिहेतुत्वस्य सोदाहरणं समर्थनम्	१०.१४
	सोदाहरणं ब्रह्मविज्ञानमहिमानुवर्णनम्	१५,२१
	ब्रह्मविज्ञानस्य असमानतायाः सोदाहरणं समर्थनम्	२३-२९
	ब्रह्मविज्ञानस्य महापापमोचकत्वम्	३०
	ब्रह्मविज्ञानसाधनोपायनिर्देशः	३१
	ब्रह्मविज्ञानस्वभावनिर्देशः	३२-३४
	ब्रह्मविज्ञानहीनानां स्वभावस्य निर्देशः	३४-३६
	योगिस्वभावनिरूपणम्	३६-४१
	वेदान्तविज्ञानस्य आत्मस्वरूपप्रतिपादकत्वम्	४२,४३
	शास्त्रस्य उपायोपेयभावबोधकत्वम्, अतीन्द्रियार्थबोधकत्वं च	४३,४४
	वेदविरुद्धार्थकथने ईश्वरस्याप्यसामर्थ्यम्	४४-४६
	ईश्वरप्रसदालभ्यवेदान्तविज्ञानस्य मुक्तिहेतुत्वम्	४७,४८
	परविद्योपायस्य वेदवेदमूलस्मृतिप्रदर्शितत्वम्	४८,४९
	वेदान्तविज्ञानस्य अवर्ण्यमहिमत्वं सम्पादनीयत्वं च	४९,५०
१०.	**ज्ञानोपायनिरूपणम्**	१-३८
	ज्ञानोपायप्रवचनविषयकसूत्रप्रतिज्ञा	१

	शान्त्यादीना ज्ञानोपायानां परिगणनम्	२-१०
	श्रौतस्मार्तातिरिक्तकर्मोपायानां ज्ञानबाधकत्वम्	१०
	पूर्वपूर्वार्जितपापपुण्ययोः क्रमशः श्रौतस्मार्तातिरिक्तश्रौतस्मार्तकर्म-प्रवृत्तिहेतुत्वम्	११,१२
	शिवाराधनबुद्ध्या नित्यकर्मसु श्रौतस्मार्तकर्मसु च प्रवृत्तेर्विज्ञाननिष्पत्त्यर्थत्वम्	१३,१४
	विध्युक्तकर्माचरणफलम्	१४-१८
	ज्ञानोपायजिज्ञासूना वैशिष्ट्यम्	१८-२०
	महादेवयजनस्य देवतान्तरयजनस्य च फलं प्रकारश्च	२०-३०
	देवतान्तरभक्तानां परमगत्यभावस्य, महादेवैकभक्ताना परमगतेश्च कथनम्	३०,३१
	महादेवैकभक्तानां विष्ण्वादिदेवतान्तरावमानने निषेधः	३१,३२
	देवतादिनिन्दनस्य वर्जनीयत्वम्	३२-३६
	श्रुत्यादिविहिताचरणविधिः	३६
	श्रुत्यादिनिषिद्धवर्जनविधिः	३७
	सत्त्वादिगुणवतां सर्वसिद्ध्यादिफलविशेषकथनम्	३७,३८
११.	**गुणस्वभावादिनिरूपणम्**	१-३८
	गुणस्वभावप्रवचनसूत्रप्रतिज्ञा	१
	सत्त्वरजस्तमोगुणानां मायासमुद्भवत्वं मायाकार्योपयोगित्वं च	२
	सर्वव्यवहारसिद्ध्यर्थकानां सत्त्वादीनां गुणानां नानाविधत्वम्	३
	सत्त्वादिगुणानां कदाचिदितरगुणद्वयमिश्रत्वस्य कथनम्	४
	सत्त्वरजस्तमोगुणाना शौक्ल्यादिजनकत्वम्	६-१४
	सत्त्वादिगुणानां सुखबुद्ध्यादिहेतुत्वम्	१४,१५
	जगतो गुणत्रयविजृम्भितत्वं, चेतनानां गुणत्रयवशत्वं च	१६
	वेदस्मृतितन्त्राणां त्रैगुण्यविषयत्वम्	१७
	वेदान्ताना पुराणानां च परमात्मपर्यवसायित्वम्	१८
	सत्त्वात्मनो हरस्य तमआत्मनो हरेः रजआत्मनो ब्रह्मणश्च क्रमशः सुखमोहदुःखवस्तूपकारकत्वम्	१९-२१
	तमोगुणाधिष्ठितस्य रुद्रस्य सर्वसंहारोपकारकत्वम्	२२

	सत्त्वगुणाधिष्ठितस्य विष्णोः सर्ववस्तुपालनोपकारकत्वम्	२३
	रजोगुणाधिष्ठितस्य ब्रह्मणः सर्ववस्तुसृष्ट्युपकारकत्वम्	२४
	निस्त्रैगुण्यस्य शिवस्य त्रिमूर्तिकर्तृत्वं, सर्ववस्तुसृष्टिस्थित्यन्तकार्योपकारकत्वं च	२५,२६
	निस्त्रैगुण्यशिवभक्तानां परमगतिप्राप्तिः, त्रैगुण्यविषयाणां संसारे परिवर्तनं च	२६,२७
	विधिनिषेधानां त्रैगुण्यवशवर्तित्वं, त्रिगुणप्रभवतत्त्वस्य सर्वदुर्घटकारणत्वं, जडत्वेन परिकीर्तनं च	२८,२९
	जडस्यापि त्रिगुणप्रभवतत्त्वस्य चित्सम्बन्धात् चेतनत्वं, संसारकारणत्वं च	२९,३०
	चित्सम्बन्धाच्चेतनत्वेन परिगण्यमानस्य जडस्य मायात्वम्, अविद्यात्वम्, तमस्त्वम्, मोहत्वम्, असत्त्वम्, शक्तित्वम्, अव्यक्तत्वम्, कारणत्वम्, व्योमत्वम्, परत्वम्, परमात्मत्वम्, आधारत्वम्, पाशत्वम्, अणुत्वम्, मलत्वम्, विष्णुत्वं च	३१-३५
	चेतनस्य आकाराणां नाम्नां चानन्तत्वम्	३६,३७
	सत्त्वादिगुणत्रयस्य लोकव्यवहारसाधकत्वम्	३७,३८
१२.	**जीवेश्वरविवेचनम्**	१-५३
	गुह्यतमतत्त्वप्रवचनविषयकसूत्रप्रतिज्ञा	१
	देहेन्द्रियादिव्यतिरिक्तस्य जीवस्य कर्तृत्वभोक्तृत्वादिविवेचनम्	२-५
	ईश्वरस्य जगज्जन्मस्थितिनाशहेतुत्वं, प्राणिकर्मणां जगत्सृष्टिनिमित्तत्वं च	६,७
	स्वस्वकर्मानुगुण्येन जीवानां स्थूलशरीरप्राप्तिः,	
	अज्ञानिजीवस्य देहान्तरावाप्तौ इन्द्रियभूतसूक्ष्मप्राणैः गमनम्	९,१०
	ज्ञानोदये जीवस्य गमागमाभावः, सकलस्य जगतः स्वस्मिन् लयश्च	११
	इन्द्रियान्तःकरणसङ्घातस्य देहत्वम्	१२
	अहङ्कारतादात्म्यमापन्नस्य जीवस्य कर्तृत्वभोक्तृत्वादिकम्	१३
	आत्मनः सुखदुःखस्वरूपत्वे ज्ञानकर्मानिवर्त्यत्वम्	१४
	अवस्थात्रयस्य अन्तःकरणकार्यत्वम्	१५,१६
	चिद्रूपस्य पुंसः अवस्थात्रयसाक्षित्वम्	१७
	परमात्मस्वरूपवर्णनम्	१८,२०
	परमात्मनः उपाधिवशादनेकधा प्रतिभासनस्य सोदाहरणमुपपादनम्	२१-२४

	देहादिष्वात्माभिमानस्य वर्णाश्रमवयोऽध्यासनिमित्तत्वम्	२५
	विधिनिषेधानां वर्णाश्रमवयोऽवस्थाविशेषावलम्बित्वम्	२६
	परमात्मनः वर्णाश्रमादिराहित्यम्	२७
	पञ्चकोशान्तर्गतस्य पुंसः संसारे परिभ्रमणम्	२८,२९
	पुण्यपापयोः कार्यानुमेयत्वं शास्त्रैकगम्यत्वं च	३०,३१
	शास्त्रैकगम्ये धर्माधर्मादिसूक्ष्मार्थे अचोद्यत्वम्	३२
	ईश्वरस्वरूपादीना शास्त्रोपदिष्टानामविपर्यासेन ग्राह्यत्वम्	३३,३४
	वेदसिद्धान्तविरुद्धानां तान्त्रिकैः प्रोच्यमानानां पुण्यपापादिसिद्धान्तानां त्याज्यत्वं,	
	वेदोपदिष्टधर्माधर्मज्ञानस्य संसारतरणहेतुत्वं च	३४-३८
	संसारबाधकज्ञानस्य साक्षादात्मविज्ञानत्वम्	३८,३९
	देहाद्यात्मवादिनां प्रवादाः	३९,४०
	आत्मपरिमाणविषयकाः वादाः	४१-४५
	देशादिपरिच्छेदरहितस्य सच्चिदानन्दस्य पुंसः संसारनिवर्तकत्वमित्यस्य	
	सिद्धान्तस्य वेदसिद्धान्तत्वम्	४५,४६
	देवमुनिप्राङ्गैः कदाचिद्वेदसिद्धान्तादन्यथा	
	संसारनिवर्तकतत्त्वस्य कथनस्य नास्तिक्यनिवृत्यर्थत्वम्	४७-५२
	वेदसिद्धस्य आत्मतत्त्वस्य ग्राह्यत्वमन्यस्य त्याज्यत्वं च	५२,५३
१३.	**भोगमोक्षोपायविवेचनम्**	१-३८
	भोगमोक्षोपायप्रवचनविषयकसूत्रप्रतिज्ञा	१
	हरं प्रति सर्वलोकहितार्थं भोगमोक्षोपायविषयकः देव्याः प्रश्नः	२-८
	ईश्वरकृतं भोगमोक्षोपायविषयकदेवीप्रश्नसमाधानम्	९-३४
	नित्यं दशसहस्रसङ्ख्यया कृतस्य तारजपस्य भुक्तिमुक्तिप्रदत्वम्	९,१०
	नित्यमष्टादशसहस्रसङ्ख्यया कृतस्य व्याहृतित्रयजपस्य भोगमोक्षप्रापकत्वम्	११
	चतुर्विंशतिलक्षसङ्ख्यया कृतस्य सावित्रीजपस्य अचिरेण भुक्तिमुक्तिप्रापकत्वम्	१२
	नित्यमयुतसङ्ख्यया कृतस्य पञ्चाक्षरजपस्य इह सुखप्रदत्वं परत्र परब्रह्मप्रापकत्वं च	१३
	प्रणवपुरःसरमादित्यमण्डले साम्बस्य शिवस्य ध्यानपूर्वकार्चनस्य भोगमोक्षप्रदत्वम्	१४
	चन्द्रमण्डले ध्यानपूर्वकं शुक्लपुष्पेण तारेण साम्बशिवार्चनस्य भोगमोक्षप्रदत्वम्	१५

शिखाग्रादौ साम्बशिवध्यानस्य महाधनपतित्वप्रापकत्वं
परमपदप्रापकत्वं च १६,१७
शिखाग्रादौ ज्योतीरूपशिवध्यानस्य भोगमोक्षप्रदत्वम् १८
शिखाग्रादौ शिवध्यानस्य महाधनपतित्वापादकत्वं देहान्ते मोक्षप्रदत्वं च १९
कन्दसंनिभत्रिकोणबाह्यपद्मदले प्रणवं व्याहृतित्रयं व्याहृतिसप्तकं
सावित्रीं च विलिख्य तदग्रे पद्मासनासीनसाम्बनीलकण्ठध्यानस्य
पापिनामपि भवबन्धमोचकत्वम् २०-२६
नदीतीरे साम्बशिवप्रतिष्ठापूजनयोः सार्वभौमपदापादकत्वम् २७,२८
प्राकारगोपुराद्युते आलये शिवं वायुकोणे षण्मुखं नैर्ऋते
विनायकं च प्रतिष्ठाप्य नृत्तगीतशुद्धान्नदानपूर्वकं
कृतस्यार्चनस्य राजविजयावहत्वं, शत्रुनाशकत्वं, आयुरारोग्यावहत्व,
मुक्तिप्रदत्वं धनधान्यराजराष्ट्राभिवर्धकत्वं च २८,३४
सूर्यकृतमध्यायार्थोपसंहरणम्, सूर्येण अध्यायार्थे भोगमोक्षोपायोपदेशे
अधिकारिणां कथनं च ३४-३८

१४. **मुक्तिस्वरूपनिरूपणम्** १-४०
मुक्तिस्वरूपप्रवचनविषयकसूत्रप्रतिज्ञा १
प्रागेव सिद्धायाः मुक्तेः प्रकाशकत्वात् ज्ञानस्य मुक्तिहेतुत्वम्,
मुक्तेः कार्यगुणक्रियासामान्यरूपताभावः, सम्बन्धान्तररूपताभावः,
परात्मस्वात्मभूतता च १-१८
अविद्यायाः आत्माच्छादकता, संसारकारणत्वं च १९,२१
अविद्यातत्कार्यसंसारयोर्निवृत्त्या मुक्तेः प्राप्यत्वम् २२
मुक्तेः कर्मसाध्यत्वस्य निरसनम् २३
मुक्तेः सर्वथा साध्यत्वस्य निरसनम् २४-२७
परायां मुक्तेरविद्यया प्रतिबन्धः, विद्यया व्यक्तिश्च २८
क्रियासाध्यानां सालोक्य-सामीप्य-सारूप्याणां मुक्तिप्रकाराणां
परमुक्तित्वनिरसनम् २९,३०
कल्पितस्य प्रातिभासिक-व्यावहारिकसत्यत्वेन परिगण्यमानस्य
जगतः कारणस्य सत्यत्वं प्रख्याप्य वेदान्तज्ञानस्य मुक्तिहेतुतायाः समर्थनम् ३१-३८

	वेदान्तविद्यायाः रुद्रप्रसादजन्यत्वं, भवबन्धमोचकत्वं सम्पादनीयत्वं च	३९,४०
१५.	**ब्रह्मविद्योपदेशयोग्यायोग्यविवेचनम्**	१-४०
	ब्रह्मविद्योपदेशयोग्यायोग्यप्रवचनविषयकसूत्रप्रतिज्ञा	१
	श्रद्धाहीनादीनां ब्रह्मविद्योपदेशायोग्यत्वम्	१-१७
	कृतशिरोव्रताचरणानां ब्रह्मविद्योपदेशयोग्यत्वम्	१८
	शिरोव्रताचरणं विना श्रौतस्मार्तसमाचाराणां ब्राह्मणानुपकारकत्वम्	१९
	शिरोव्रताचरणमहिमानुवर्णनम्	२०-३८
	शिरोव्रताचरणस्य ब्रह्मादिदेवतानां देवतात्वे हेतुत्वम्	२०
	शिरोव्रतमाहात्म्यस्य ब्रह्मादिप्रोक्तत्वम्	२१
	शिरोव्रताचरणस्य सर्वपातकमोचकत्वम्	२२
	शिरोव्रतस्य आथर्वणश्रुत्युक्तत्वम्	२३
	आथर्वणश्रुतिशाखाभेदानुरोधेन शिरोव्रतस्य विभिन्नसंज्ञावत्त्वम्	२४
	शिवाख्यसत्यादिजिज्ञासूनां शिरोव्रताचरणस्यावश्यकता	२५,२६
	शिरोव्रतविहीनस्य सर्वधर्मसमन्वितस्यापि ब्रह्मविद्यानधिकारित्वम्	२७
	शिरोव्रतस्य सर्वपापनिवारकत्वं, शुद्धविद्यासाधनत्वं, सम्यगाचरणीयत्वं च	२८,२९
	शिरोव्रताचरणे क्रमः फलं च	३०-३२
	शिरोव्रतस्नाताय गुरुणा विद्याया अनुपदेशे फलम्	३३,३४
	जन्मान्तरसहस्रेषु धर्मचारिणामेव शिरोव्रतश्रद्धायाः सम्भवः	३५-३७
	ब्रह्मविद्योपदेशे शिरोव्रतस्नातानामेवाधिकारः, अन्येषामनधिकारः	३७,३८
	प्रतिषिद्धक्रियापराणां ब्रह्मविद्यानधिकारित्वम्	३९
	अध्यायार्थनिगमनम्	४०
१६.	**सौरसंहितार्थसङ्क्षेपणम्**	१-१०१
	सर्वार्थसङ्क्षेपप्रवचनविषयकसूत्रप्रतिज्ञा	१
	स्वयम्भातपरमतत्त्वातिरिक्तानामभावस्य वर्णनम्	२-४
	परमतत्त्वस्य अहंतेदंतादिभेदराहित्यम्	५
	स्वयम्भातपरमतत्त्वविषयकवक्तृश्रोतृवचनादिजिज्ञासूनां मौनेनैवोत्तरणीयता	६-८
	सर्वार्थकल्पनाहेतोरविद्यायाः निरूपणम्	८-१०
	वेदान्तदर्शनानुरोधेन अविद्याज्ञानमायाख्यमलस्यैव संसारकारणत्वम्	११

रागद्वेषादिदोषाणां च संसारकारणत्वम् १२
आणवाख्यमलस्य संसारकारणत्वेन अनौचित्यम् १३
आणवाख्यस्य मलस्य मायानतिरिक्तत्वम् १४-३२
आणवाख्यस्य मले कल्पितत्वयथार्थत्वयोः जिज्ञासा,
तत्र कल्पितत्वे आणवाख्यमलस्य अविद्यानतिरिक्तत्वम् १४
आणवाख्यमलस्य यथार्थत्वे आणवाख्यमले स्वरूपत्वधर्मत्वयोराशङ्कनं
तन्निवारणं च १५-१७
आणवाख्यमलस्य आत्माभिन्नत्वकथनम् १८
आणवाख्यमलस्य अचित्त्वे चिद्विरोधादस्थायित्वस्य सोदाहरणं समर्थनम् १९-२५
आणवाख्यमलस्य गुणद्रव्यक्रियाजातिरूपेण चिदनाश्रितत्वात्
आत्मनि कल्पितत्वाच्च मायया अभिन्नत्वस्य कथनम् २६-३२
वेदार्थज्ञानजन्यस्य आणवादिमलोच्छेदस्य मोक्षत्वम् ३३,३४
विद्यायाः कल्पितमलनिवर्तिकायाः वेदान्तवाक्योत्थत्वम्,
अविद्यायाः कर्मसाधनत्वं च ३५
रुद्रस्य संसारमोचकत्वम् ३६
प्रत्यक्षादिप्रमाणेषु श्रुतेरेव बलीयस्त्वस्य निरूपणम् ३७-४६
श्रुत्यर्थतन्त्रार्थयोर्विकल्पाप्रसक्तिः, श्रुतिमानस्यासमानमानत्वं च ४७-५०
तन्त्रोदिततत्त्वाचाराणां हेयत्वं, श्रुत्युपदिष्टार्थस्य ग्राह्यत्व च ५१,५२
प्रत्यक्षादिप्रमाणानां वेदाविरोधेनैव प्रमाणत्वम् ५३
प्रत्यक्षादिप्रमाणेषु दोषसम्भावनायाः प्रसक्तेः श्रुतिप्रमाणे
दोषसम्भावनाया अप्रसक्तेश्च कथनम् ५४-५७
वेदप्रतिपादितस्य स्वात्मतत्त्वस्य स्वतःसिद्धत्वं,
स्वात्मतत्त्वातिरिक्तानां तत्त्वानां मायासिद्धत्वं च ५८-६०
परतत्त्वस्य भ्रान्तिमूलकत्वम् ६०-६२
सङ्कचादिनिर्मुक्तस्य शिवाख्यपरतत्त्वस्य स्वानुभवेन
दर्शनात् परब्रह्मत्वप्राप्तेः कथनम् ६३-६५
विज्ञानस्याज्ञाननाशकत्वमज्ञाननाशस्य संसारनाशकत्वम् ६६
आत्मानात्मविज्ञानदग्धाविद्यस्य पुंसः जीवन्मुक्तत्वं कर्मलेपाभावश्च ६७

अनारब्धाना पुण्यपापात्मकानां कर्मणां ज्ञानाग्निदह्यमानत्वस्य कथनम्	६८
आरब्धानां कर्मणां फलभोगमात्रनाश्यतायाः कथनम्	६९
श्रुत्युक्तार्थस्य चोद्यार्हत्वनिरासः यथोपदेशसङ्ग्राह्यत्वं च	७०
श्रुत्यर्थकथनोपसंहरणम्	७१
श्रुत्यर्थकथनोपसंहरणात् परं सूरेण कृतस्य शिवाध्यानस्य सपरिवारसाम्बशिवसाक्षात्कारस्य च सूतेन कथनम्	७२-७४
सूरकृता साम्बशिवस्तुतिः	७५-९०
सौरसंहिताप्रवचनान्ते सूतेन महादेवं स्तुतवतः सूरस्य **विवशीभावादीनां वर्णनं सौरसंहितोपसंहरणं च**	९१-१०१
सौरसंहिताप्रवचनान्ते महादेवं स्तुतवतः सूरस्य विवशीभावः, सौरसंहिताप्रवक्तारं सूरमनुगृहीतवतो महादेवस्यान्तर्धानं च	९१,९२
सौरसंहितायाः प्रवक्तारं सूरं श्रोतारं याज्ञवल्क्यं चालिङ्ग्य ब्रह्मविष्ण्वोरन्तर्धानं, सौरसहिताश्रवणेन प्रसन्नानां बुधानां स्वगृहगमनं च	९३
सूरात् सौरसंहितां श्रुत्वा सूरं नत्वा याज्ञवल्क्यस्य वाराणसीं प्रति गमनम्	९४
सौरसहिताश्रवणस्य सौरसंहितायाः व्यासनिर्मितत्वम्	९६
सौरसंहितापठनश्रवणफलम्	९७-९९
सौरसंहिताकथनान्ते कृतसाम्बेश्वरध्यानस्य सूतस्य विवशता, वालखिल्यैर्यथार्हं सूतस्य पूजनं च	१००-१०१

-०-०-०-

सौरसंहिता

(स्कान्दान्तर्गता)

प्रथमोऽध्यायः

ओं नमोऽहंपदार्थाय तत्त्वमर्थस्वरूपिणे ।
भासकाय समस्ताय भवाय भवहारिणे ॥ १ ॥

FOOTNOTES :

D. Begins with : निरस्ताशेषदोषाश्च समस्तगुणभाजनाः । (I 79 cd)

D1 Begins with : श्रीगणेशाय नमः । ओ नमोऽहपदार्थाय..

D2 Begins with : शिवाभ्याम् । ओ नमोऽहंपदार्थाय. .

D3 Begins with : . . वक्ष्यामि लक्षग्रन्थविनिर्मितम् । (I. 27 ab.)

D4 Begins with . दुण्ढिराजाय नम· । स्कान्दे सौरसहिता । ओ नमोऽहपदार्थाय ..

D5 Begins with · श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नम. । हरि ॐ । ओ नमोऽहपदार्थाय...

M Begins with : श्रीमहागणपतये नम । अविघ्नमस्तु । ओ नमोऽहपदार्थाय .

M1. M2. Begins with श्रीगणपतये नमः । अविघ्नमस्तु । ओ नमोऽहपदार्थाय...

T. Begins with : अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकद त भक्तानामेकदन्तमुपास्महे ॥
श्रीगुरुभ्यो नमः । ओ नमोऽहपदार्थाय .

1b) D1, D2, D5, G, G1, G2, G5,G6,M,M1, M2, T, T1, T2 } पराहन्ता० for तत्त्वमर्थ.

D4, G3 तत्पदार्थ०
G7. वराहन्ता० } for तत्त्वमर्थ०
D6. पराहन्ताय०

1c) D1, D2, D5, D6, G, G1, G3, G4, G6, T2. } भास्कराय for भासकाय

D1, D5, D6, G1, G2, G6, G7. नमस्तस्य
D4, G3, G4, T1, T2 नमस्तस्मै } for समस्तस्य

1d) D4 भवाहय for भवाय

D1, D2, D5, D6. ०य० for ०व०

1) D, D3. Om.

नमः साम्बाय शर्वाय सर्वविज्ञानदायिने ।
स्वशक्तिरचितेदन्ताहन्तारूपाय साक्षिणे ॥ २ ॥
समस्तजगदुत्पत्तिस्थितिनाशैकहेतवे ।
रुद्रविष्णुविरिञ्चादिस्वरूपाय नमो नमः ॥ ३ ॥
प्रमाणानामगम्याय स्वयंभानाय केवलम् ।
नमः सकलमानानां मानभूताय शम्भवे ॥ ४ ॥
वर्णाश्रमसमाचारनिरतानां महात्मनाम् ।
सुलभाय विनीतानां नमः संसारहेतवे ॥ ५ ॥
भस्मसाधननिष्ठानां भक्तानां भस्मदायिने ।
भस्मरूपाय रुद्राय नमो भक्तिप्रदायिने ॥ ६ ॥

2a)	D1, G3.	स० for श०
2b)	D5.	०य for न०
2c)	D5.	०हि० for ०चि०
	D6.	०क्तिभिरचिन्त्याय for ०क्तिरचितेदन्ता०
	G.	०दा० for ०द०
2)	D, D3.	Om.
3a)	T2.	नमस्ते for समस्त०
3c)	D4.	०ञ्या० for ०श्रा०
3)	D, D3.	Om.
4-8)	D, D1, D2, D3, D6, G, G1, G2, G5, G6, G7, T.	Om.
4d)	D4.	०दाताय } for ०भूताय
	D5.	०तादाय
	G3.	०दानाय
	M2.	०त्राताय
	T1.	०त्राणाय
5c)	D5	०याविनीताय } for य विनीतानाम्
	M2	०याविनीतानाम्
5d)	T1, T2	०हा० for ०सा०
6a)	T1, T2.	०नाथस० for ०साधन०
6b)	T1.	मुक्ति० for भस्म०
6d)	M.	मु० for भ०

पाशहन्त्रे परानन्दप्रदात्रे परमात्मने ।
परविद्यापराणां तु नमः परशुधारिणे ॥ ७ ॥
नमो विनायकस्कन्दसुताय भयहारिणे ।
अम्बिकापतये साक्षाज्जगतां गुरवे सदा ॥ ८ ॥
प्रणम्य साम्बमीशानं सर्वदेवनमस्कृतम् ।
पुराणं सम्प्रवक्ष्यामि जगतामभिवृद्धये ॥ ९ ॥
सत्रान्ते सूतमायान्तं जटावल्कलसंयुतम् ।
त्रिपुण्ड्रावलिभिर्दीप्तं भस्मोद्धूलितविग्रहम् ॥ १० ॥
सर्वशास्त्रार्थतत्त्वज्ञं सर्वभूतहिते रतम् ।
व्यासशिष्यं विशेषेण महाभक्तं शिवस्य तु ॥ ११ ॥
स्वयमेवागतं शम्भोः प्रसादादेव केवलम् ।

7a)	M.	पश० for पाश०
7ab)	T2.	Om
7c)	G3.	०रा० for ०र०
8b)	D5, G4, M, M1, M2, T1, T2.	०व० for ०य, the second.
8d)	T1.	नमः for सदा
9a)	M2	देव for साम्ब०
9)	D, D3.	Om.
10a)	D5,G3,G4,M M1,M2,T1,T2. G.	०मद्वन्द्वम् ०मद्वैतम् } for ०मायान्तम्
10b)	D5,D6,G3.	०धारिणम् for ०सयुतम्
10ab)	D4.	सूत पप्रच्छुर्वालखिल्या मुनीश्वराः for सूतमद्वैत जटावल्कलसंयुतम्
10c)	T.	०ण्डूम्० for ०ण्ड्रा०
10d)	T.	०धूळि० for ०द्धूलि०
10cd)	D4.	Om.
10)	D,D3.	Om.
11)	D,D3,D4	Om
12a)	G.	०मेव for ०मेवागतम्
12b)	G4.	Om देव.

तेजसा भासयन्तं तं चेतनाचेतनात्मकम् ॥ १२ ॥
वालखिल्या महात्मानं महाभक्तिं समास्थिताः ।
पुराणसंहितां पुण्यां पप्रच्छुः पुण्यगौरवात् ॥ १३ ॥
भवता भगवान् व्यासः सर्वज्ञः करुणाकरः ।
पुराणविद्यासिद्ध्यर्थं पुरा सम्यगुपासितः ॥ १४ ॥
तेन पौराणिकी विद्या व्यासेनामिततेजसा ।
उपदिष्टा तु यास्माकं वक्तुं तामर्हसि प्रभो! ॥ १५ ॥
मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः ।
वक्तुमारभते विद्यां नमस्कृत्य पिनाकिनम् ॥ १६ ॥

12c)	D1,D2,D5,D6,G,G1,G2,G6,T.	भासयन् सर्वम् } for भासयन्तं तम्.
	D5,M,M1,M2.	रूपयन् सर्वम् }
	T1.	पूर० for भास०
12d)	G7.	०चेतन जगत् for ०चेतनात्मकम्
12)	D,D3,D4	Om.
13a)	D1,D2,D6,G,G1,G4,G7,T2.	०त्मानो for ०त्मानम्
13b)	D1,D2.	०शक्ति } for ०भक्तिम्
	D4.	०भक्ति }
	G3.	०भक्तम् }
	M,M2,T1,T2.	भक्तिसमन्वितः for ०भक्ति समास्थिता·
	M1	०तम् for ०ताः
13)	D,D3,D4.	Om.
14b)	D1,D2,G,G7.	०निधि. for ०करः
	G4	Om. ०णाकर·
14)	D,D3,D4,	Om.
15b)	T1.	०जात० for ०मित०
15c)	D1.	तया } for तु या०
	D6.	त्वया }
	G3,G4,M,M1,M2,T1,T2	त वा० }
15)	D,D3,D4.	Om.
16b)	T1	तेषा for सूतः
16c	D5,G3,M,M1,M2,T1,T2.	देवम् } for विद्याम्
	D6.	सर्वम् }
16d)	D2,G1,G5,G6,G7,T1.	त्वा for त्य
16)	D,D3,D4.	Om.

सूत उवाच

ब्राह्मं[१] पाद्मं[२] वैष्णवं[३] च शैवं[४] भागवतं[५] तथा ।
भविष्य[६]न्नारदीयं[७] च मार्कण्डेय[८]समाह्वयम् ॥ १७ ॥
आग्नेयं[९] ब्रह्मवैवर्तं[१०] लैङ्गं[११] वाराहमेव[१२] च ।
स्कान्दं[१३] च वामनं[१४] चैव कौर्मं[१५] मात्स्यं[१६] च गारुडम्[१७] ॥१८॥
ब्रह्माण्डं[१८] चेति पुण्योऽयं पुराणानामनुक्रमः ।
अन्यान्युपपुराणानि कथितानि महर्षिभिः ॥ १९ ॥
अष्टादशपुराणानि श्रुत्वा संक्षेपतो द्विजाः ।

Between verse No.		
16 & 17)	G1,	श्रीसू० for सू०
	D4,D5,G3,M,M1,M2,T1,T2.	सूतः- for सूत उवाच -
	D,D3.	Omit सूत उवाच -
	D4.	Adds महादेव नमस्कृत्य प्रोवाच सूर्यसहिता after सूत उवाच - and before ब्राह्मच पाद्मच
17c)	D1,D4,D6,G,G5,G6,G7,T,T1,T2.	०ष्यम् for ०ष्य०
17)	D,D3.	Om.
18a)	D5,D6,G,G1,G2,G3, G4,G5,G6,G7,T,T1,T2.	कै० for वै०
18b)	D4,D5,G4,M,M1,M2,T1,T2.	०सञ्जितम् for ०मेव च
	G3.	०सञ्जिकम् for ०मेव च
18c)	G6.	Om स्कान्दम् ; M Om च
18d)	T.	०र्म्यम् for ०र्मम्
	D6.	पराशरम् for च गारुडम्
18)	D,D3.	Om.
19b)		०मुप for ०मनु
19ab)	D6.	गारुड च ततः पश्चात् ब्रह्माण्ड च तत.परम् । for ब्रह्माण्ड चेति पुण्योऽय पुराणानामनुक्रम० ।
19d)	M.	श्रुत्वा सङ्क्षेपरूपत. for कथितानि महर्षिभिः
	M2.	Om र्षिभिः
19)	D,D3	Om.
20b)	D5,G3,G4,M1,M2,T1,T2.	०रूपत for ०तो द्विजा
20ab)	D6.	०ना कर्ता सत्यवतीसुतः for ०नि श्रुत्वा सक्षेपतो द्विजाः
	M	Om.

तान्यप्यहं प्रवक्ष्यामि कथितानि शिवाज्ञया ॥ २० ॥
आद्यं सनत्कुमारोक्तं[१] नारसिंहं[२] ततः परम् ।
तृतीयं स्कान्दमुद्दिष्टं[३] कुमारेण तु भाषितम् ॥ २१ ॥
चतुर्थं शिवधर्माख्यं[४] पुराणं नन्दिनेरितम् ।
ततो दुर्वाससा[५] प्रोक्तं नारदीयं[६] ततः परम् ॥ २२ ॥

20c)	D1.	०ह सप्र for ०प्यह प्र
	D5.G3,G4,M,M1,M2,T1,T2.	तेषामनुक्रम वक्ष्ये for तान्यप्यह प्रवक्ष्यामि
20d)	D5,G3,G4,M,M1,M2,T1,T2.	सर्वपापविशोधकम् ॥ for कथितानि शिवाज्ञया ॥
20cd)	D6.	अन्यान्युपपुराणानि मुनिभि· कीर्तितानि च ॥ for तान्यप्यह प्रवक्ष्यामि कथितानि शिवाज्ञया ॥
20)	D,D3,D4.	Om.
21a)	G6.	Om. सनत्कुमा for क्तम्
21c)	D1,G,G5.	स्क० for स्का०
	G3,G4,M,M2,T2.	स्कान्दसज्ञ कुमारेण
	D4,D5.	नादसज्ञ कुमारेण } for तृतीय स्कान्दमुद्दिष्टम्
	M1	नन्दसज्ञ कुमारेण
	G2,G5.	०मित्युक्त for ०मुद्दिष्टम्
21d)	D4,D5,G3,G4,M,M1,M2,T2.	कथित तदनन्तरम् ॥ for कुमारेण तु भावितम् ॥
21cd)	D6.	नन्द्याख्य शिवधर्माख्य दौर्वास नारदीयकम् ॥ for तृतीय स्कान्दमुद्दिष्ट कुमारेण तु भाषितम् ॥
	M1	Om.
21)	D,D3.	Om.
22a)	D4,	Om चतुर्थम्
	D6,	कापिल वामन प्रोक्त for चतुर्थ शिवधर्माख्यम्
22b)	D4.	Om पुराणम्
	D6	ब्रह्माण्ड वारुण तथा । for पुराण नन्दिनेरितम् ।
22c)	G,G1,G2,G3,G4,G5,G6,G7,T	अ० for त०
	D1,D2,G,G1,G2,G3,T.	दूर्वाससप्रोक्तम् } for दुर्वाससा प्रोक्तम्
	G4,T2.	दौर्वाससप्रोक्तम्
	D6.	वालीव सिष्ठलैङ्ग च for ततो दुर्वासा प्रोक्त
22d)	D6.	साम्बमाहेश्वर तथा । for नारदीयं ततःपरम् ।
22)	D,D3,T1.	Om.

कापिलं[9] मानवं[c] चैव तथैवोशन[a]सेरितम् ।
ब्रह्माण्डं[10] च ततः पुण्यं वारुणाख्यं[11] ततः परम् ॥
ततः काली[12]पुराणाख्यं कालकण्ठं च नामतः ।
ततो वासिष्ठ[13]लिङ्गाख्यं नाम्ना माहेश्वरं त्विति ॥ २४ ॥
ततः साम्ब[14]पुराणाख्यं सुसूक्ष्ममिति चेरितम् ।
ततः सौर[15]पुराणाख्यं सावित्रमिति चेरितम् ॥ २५ ॥

23a) G5. कापिलो } for कापिलम्
M2. कपिलम् }
D4. Om. चैव

23b) D4. उशनसेरितम् ।
for तथैवोशनसेरितम् ।

23ab) D6. सौरं पाराशर चैव मारीच भार्गवं ततः ।
for कापिल मानव चैव तथैवोशनसेरितम् ।

23c) D4. Om. च ततः पुण्यम् ; M2. Om. च त

23d) D4. वारुण.....
for वारुणाख्यं ततःपरम् ॥

23) D,D3,T1. Om.

24a) D1. Om. ततः ; T2 लि for ली ; M2 क for का

24b) G1,G3. कर्णम् for कण्ठम्
G4. सावित्रमिति चेरितम् ।
for कालकण्ठ च नामतः ।

24c) D. Om. ततो
D2,D4,D5. ०लैङ्गा } for ०लिङ्गा
G1. ०लैङ्ग्चा }

24d) T2. नाम विश्वेश्वरम् for नाम्ना माहेश्वरम्

24cd) G4. Om.

24) D,D3,D6. Om

25a) D4. Om. ततः
D1. शा० for सा०
T2. ०म्बन् for ०म्ब

25d) G. ०त्री० for ०त्र०

25cd) T1. Om.

25) D,D3,D6,G4. Om.

पाराशर्यं[१६] च मारीचं[१७] भार्गवं[१८] मुनिपुङ्गवाः ।
सर्वाण्युपपुराणानि शिवज्ञानकराणि वै ॥ २६ ॥
स्कान्दमद्याभिवक्ष्यामि लक्षग्रन्थविनिर्मितम् ।
षड्विधं संहिताभेदैः पञ्चाशत्खण्डमण्डितम् ॥ २७ ॥
संहितान्त्या बुधास्तासु या सा सौरसमाह्वया ।
तामहं वः प्रवक्ष्यामि संहितामतिशोभनाम् ॥ २८ ॥

26a)	M1,M2,T1.	०रम् for ०र्यम्
26b)	G4.	Om. निपुगवाः
26ab)	D6.	Om.
26c)	G4.	Om स
	T.	०ण्येव प्रु० for ०ण्युपपु०
26)	D,D3.	Om.
27a)	D3.	Om. स्कान्दमद्याभि
	D5,G.	०पि० for ०भि०
27b)	D6.	०क्ष्य० for ०क्ष०
27c)	G1.	०धा for ०धम्
27d)	D3,D5,D6,G,G1,G2,G4, G5,G6,G7,M1,M2,T.	०भेदितम्॥ } for मण्डितम्॥
	G3.	०भेदतः॥ } for मण्डितम्॥
	M2.	०शम् for ०शत्
27)	D,D4.	Om.
28a)	D6.	०ताभ्यां } for ०न्त्या
	G3,G4,M2,T1.	०न्या } for ०न्त्या
	G7	०सु } for ०न्त्या
	G4,T2.	बुधस्ताभिः for बुधास्तासु
28b)	G4.	यया } for या सा
	G7.	यासौ } for या सा
	T2.	या या } for या सा
28c)	D1,D2.	सं प्र० for वः प्र०
	G6.	Om. तामहं वः प्र
28)	D,D4.	Om.

पुरा सूरसमाख्येन कथिता भानुना यतः ।
याज्ञवल्क्याय तेनैव संहिता सौरसंहिता ॥ २९ ॥

सौरसंज्ञा तु सा त्वत्र ग्रन्थतस्तु सहस्रतः ।
निर्मितः सर्वविज्ञानसागरा पावनी परा ॥ ३० ॥

प्राधान्येन महादेवः पुराणैरखिलैरपि ।
तात्पर्येणाम्बिकानाथः सर्वज्ञः प्रतिपाद्यते ॥ ३१ ॥

तच्छेषत्वेन रुद्रश्च तदंशः प्रतिपाद्यते ।
तथा विष्णुस्तथा ब्रह्मा तथा देवा अपि द्विजाः ॥३२ ॥

29a)	D3,G2,G5.	०र्य for ०रः
29b)	G4.	Om. भानुना यतः
29ab)	D4.	Om
29c)	D1,G.	०ल्का० for ०ल्क्या० ; T1. ०वम् for ०व
29d)	T1.	०ङ्गि० for ०हि०
29cd)	D4.	इय स्कान्दे भानुनोक्ता याज्ञवल्क्याय for याज्ञवल्क्याय तेनैव सहिता सौर०
29)	D.	Om
30a)	M.	या for सा
	G4.	०न्च० } for त्व०
	G5.	त० } for त्व०
	G6.	Om. सा त्वत्र
30b)	T1.	तत्र सारम् for ग्रन्थतस्तु
	D5.	कम् } for तः
	G3.	कः } for तः
	T1.	०सयता for ०सागरा
30d)	D.	Om.
31)	D.	Om.
32b)	D4.	विष्णुब्रह्मादिदेवताः । for तदश. प्रतिपाद्यते ।
	G7.	०दी for ०द०
32c)	D4.	तत्रेश्वरस्तु दशभिः } for तथा विष्णुस्तथा ब्रह्मा
	T1.	विष्णुस्तथा ब्रह्म तथा } for तथा विष्णुस्तथा ब्रह्मा
32d)	D4.	चतुर्भिर्विष्णुरुच्यते ॥ for तथा देवा अपि द्विजाः ॥
	G3.	वेदा for देवा
32)	D.	Om.

कथ्यते दशभिर्विप्राः पुराणैः परमेश्वरः ।
चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा जगत्पतेः ॥ ३३ ॥
एकेनाग्निस्तथैकेन भगवांश्चण्डभास्करः ।
सर्वैः सर्वाः समाख्याता देवता अपरा अपि ॥ ३४ ॥
रुद्रविष्ण्वादिदेवानां यः कर्ता शिवसंज्ञितः ।
स एव सर्वमानानां निष्ठा साम्बः सनातनः ॥ ३५ ॥
अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
तेषामेव प्रवक्तारं स मुनिर्मामचोदयत् ॥ ३६ ॥
पुराणैरेव वेदार्थो विस्पष्टो जायतेऽखिलः ।
यश्चतुर्वेदविद्विप्रः पुराणं वेत्ति नार्थतः ॥ ३७ ॥

33a) D4. द्वाभ्या वालातिरेकेण for कथ्यते दशभिर्विप्राः
G4. ०प्र for ०प्राः
33b) D4. तथैकेनैव भास्करः। for पुराणैः परमेश्वरः।
33c) D5,D6. कथ्यते for भगवान्
33d) D1,D2,G. प्रकीर्तितः। for जगत्पतिः।
33cd) D4. Om.
33) D. Om
34b) D5 ०स्कः। for ०स्करः।
34ab) D4. Om.
34) D. Om.
35) D. Om. ; Before 36c) D4. Adds व्यासः
36c) T1. प्रकारे तु for प्रवक्तारम्
36d) D1. ०न० for ०म०
D4. व्यासो मा०
D5. गुरुर्मा } for मुनिर्मा०
G,M,M1,M2,T1. ०योज० for ०चोद०
36) D. Om.
37b) D5. नाथते खलु।
G5. ज्ञायते खलु। } for जायतेऽखिलः।
D3,D6,G3,G4,G6,G7,M1,T1,T2. खलु।
G,T. ०खिलम्। } for ०खिलः।
37cd) D1,D2,D3,D4,D5,D6,G,G1,G2,G3,G5,G6,G7,M1,M2,T,T1. Om.
37) D,M. Om.

तं दृष्ट्वा भयमाप्नोति वेदो मां प्रतरिष्यति ।
पुराणेन ततः साक्षाद्वेदं समुपबृंहयेत् ॥ ३८ ॥
बिभेति मानवाद्वेदः पुराणाभ्यासवर्जितात् ।
यस्तु वेदविरुद्धांशः पुराणेष्वखिलेषु च ॥ ३९ ॥
तदंशस्तु परित्याज्यः सर्वथा वैदिकैरपि ।
तन्त्रावलम्बनेनैव पुराणानि च कानिचित् ॥ ४० ॥
साक्षाद्वेदविरुद्धार्थं प्रवदन्ति क्वचित् क्वचित् ।
अधिकारिविभेदेन नैव वेदपरं प्रति ॥ ४१ ॥
स्मृतिष्वपि गतिर्ह्येषा ताः कर्म प्रवदन्ति हि ।
प्राधान्येन बुधा अर्थाद्वदन्ति च महेश्वरम् ॥ ४२ ॥

---

38) D,D1,D2,D3,D4,D5,D6, G,G1,G2,G3,G5,G6,G7, M,M1,M2,T,T1. } Om.

39a) D1,D2,D3,D4,D5,D6, G,G1,G2,G3,G4,G5, G6,G7,M,M1,M2,T,T1. } मामयम् / समयम् } for मानवाद्

39b) D3,G3,M1,M2, ०तम्। / D4,. ०ताम्। / D5,D6,G6,G7,M,T2,. ०तिः। } for ०तात्।

39c) D3. ०त्तु / M,M1,M2,T1 ०श्च } for ०स्तु

G4. Om. यस्तु

39d) M. ०ष्वपि ॥ for ०षु च ॥

39) D. Om.

40b) T1. ०दा for ०था

D3,D4,D5,G3,G4,T2 सकलै० for वैदिकै०

40d) D4. हि for च

40) D. Om.

41c) D1. ०र० for ०रि०

41cd) Om. भेदेन नैव वेद

41) D. Om.

42b) D5. क्रमम् for कर्म

42) D. Om.

ब्रह्म सर्वजगन्मूलं तज्ज्ञानं तस्य साधनम् ।
भस्मनोद्धूलनं तिर्यक् त्रिपुण्ड्रं शिवपूजनम् ॥ ४३ ॥
प्राधान्येन पुराणानि प्रवदन्ति हि सादरम् ।
वेदसिद्धेषु धर्मेषु मतिर्येषां विजायते ॥ ४४ ॥
दुर्लभाः खलु ते सर्वे नैव संशयकारणम् ।
वैभवं सर्ववेदानां कः पुमान् वक्तुमर्हति ॥ ४५ ॥
शिव एव खलु प्राज्ञो यथावद्वक्तुमर्हति ।
ब्राह्मणानां च वेदानां वैभवं केवलैर्नृभिः ॥ ४६ ॥
शक्यते नैव विज्ञातुं कल्पकोटिशतैरपि ।
प्रसादादेव रुद्रस्य भवानीसहितस्य तु ॥ ४७ ॥

43a)	M,M1,T1,T2.	०ह्मा for ०ह्म
43d)	G7,	Om. ०शिव
43)	D	Om.
44a)	G4.	Om धान्येन
	D5,D6,G6,G7,M,T2,	०तिः ।
44c)	D1,D2.	मार्गे० for धर्मे०
44d)	G6.	Om. षा विजायते ॥
44)	D	Om.
45a)	G6.	Om. दुर्ल०
45c)	D6.	देवा० for वेदा० ; T2. तस्य for सर्व०
45d)	D1,D2,D6,G,M,T	०सि ॥ for ०ति ॥
45cd)	D4.	Om
45)	D.	Om.
46b)	D1,D2,	०सि । for ०ति ।
	G6.	Om. ०यावद्वक्तुमर्हति ।
46ab)	D4,T2.	Om.
46d)	T2.	०व· for ०वम् , D5,G5. ०लम् for ०लैः
	G4,T2.	न हि ॥ for नृभिः ॥
46)	D.	Om
47c)	G6,T.	प्रा० for प्र०
47d)	G6.	Om. भवानीसहि ; D3,D4,G3,M. च for तु
47)	D.	Om.

शक्यते वेदितुं तेषां वैभवं किञ्चिदास्तिकाः! ।
विश्वाधिको महादेवः कृपया केवलं बुधाः ॥ ४८ ॥

धरण्यां विप्ररूपेण वर्तते खलु नान्यथा ।
अविनीतोऽपि बालोऽपि ज्ञानहीनोऽपि ब्राह्मणः ॥ ४९ ॥

पूज्यः सर्वजनैर्नित्यं स शिवः खलु नेतरः ।
ब्राह्मणानां शरीरेषु वर्तन्ते सर्वदेवताः ॥ ५० ॥

वाचि वेदाः सहाङ्गैश्च ततः पूज्या हि ब्राह्मणाः ।
किञ्चिन्मात्रमपि प्राज्ञा वेदानां वाचि विद्यते ॥ ५१ ॥

येषां ते पूजनीया हि सर्वदा सर्वजन्तुभिः ।
वेदस्याध्ययनेनैव वेदार्थः परमेश्वरः ॥ ५२ ॥

---

48) D. Om.
49b) T1. च महेश्वर.। for खलु नान्यथा।
49d) D1,D2,D3,D4,G4,G5,G7, M,M1,M2,T,T1,T2. } वाडव.॥
D5,G,G1,G2. } बान्धवः॥ } for ब्राह्मण॰॥
D6. } साधवः॥ } for ब्राह्मण॰॥
G6. } बाधप.॥ } for ब्राह्मण॰॥
49cd) T1. दुर्विज्ञेयो वादिग्रश्च ततः पूज्यो हि for अविनीतोऽपि बालोऽपि ज्ञानहीनो हि
49) D. Om.
50b) M. दुर्लभः। for नेतरः।
50d) G6. Om. वर्तन्ते सर्व
50) D,G4,T1,T2. Om.
51b) D4. ते सदा। } for ब्राह्मणा॰।
D5. बान्धवा॰। } for ब्राह्मणा॰।
M,M1,M2. वाडवा॰। } for ब्राह्मणा॰।
51ab) G4,T1,T2. Om.
51d) G4,T2. ०नामपि for ०ना वापि ; D3,D4 ०पि for ०चि
D1,T,T1,T2. वर्त० for विद्य०
51) D. Om.
52a) G4. Om. ते पूज ; G6. Om. ते पूजनीया हि
52b) G7. Om. दा सर्व
52) D. Om.

प्रसन्नः पार्वतीनाथः परिज्ञानं ददाति हि ।
महादेवप्रसादेन खलु वेदार्थविद्भवेत् ॥ ५३ ॥
नेतरस्य ततः शम्भुं सादरं नित्यमर्चयेत् ।
मेरुशृङ्गे पुरा रम्ये सर्वयोगिनिषेविते ॥ ५४ ॥
पाराशर्यो महायोगी व्यासः सर्वार्थवित्तमः ।
भूत्वा पञ्चाग्निमध्यस्थो वाग्यतो विजितेन्द्रियः ॥ ५५ ॥
आम्नायान्तैकसंवेद्यं साम्बं संसारभेषजम् ।
नीलकण्ठं विरूपाक्षं चन्द्ररेखावतंसकम् ॥ ५६ ॥
तताप परमं घोरं तपः सन्तर्पयच्छिवम् ।
तपसा तस्य सर्वज्ञः संसारोदधितारकः ॥ ५७ ॥

---

53) D. Om.

54a) D1. वित्तमः भूत्वा शम्भु for नेतरस्य ततः शम्भुम्

D6. Om. र

54b) M,M1. सदारम् } for सादरम्
D5. सतारम् }

54c) G3. महा० for पुरा

54) D. Om

54cd) D4. Reads in prose order follows· कथा - पुरा व्यास. पञ्चाग्निमध्यस्थ तप· तप्त्वा शिव साक्षात्कृत्वा तत्प्रसादेन वेद चतुर्धा कृतवान्।

55c) G3 कृ० for भू०

55d) M,M1,M2 निय० for विजि०

55) D,D4. Om.

56a) D5. आम्नायान्तेन } for आम्नायान्तैक०
T1. आम्नायान्त सु० }

56b) G4. Om. सार

56c) G4,T2. ०ग्रीवम् for ०कण्ठम्

56d) G3. ०ले० for ०रे० ; G7. Om. रेखा and कन्

56) D,D4. Om.

57b) G4,T2. ०तः for ०पः ; T1. सतोषयन् for संतर्पयन्
D1,D2,D3,G,G1,G3,G4,G6,G7,M,M1,M2,T,T1,T2. ०च्छि० for ०च्छि०

57c) G4. Om. तपसा

57) D,D4. Om.

प्रसन्नः परया शक्त्या सह सन्निहितोऽभवत् ।
तं दृष्ट्वा रुद्रमीशानं कृष्णद्वैपायनो मुनिः ॥ ५८ ॥
प्रणम्य लोकरक्षार्थं प्रसादादेव शूलिनः ।
अप्रकाशयदाम्नायमशेषार्थावतंसकम् ॥ ५९ ॥
चतुर्धा कृतवान् विप्रा यथापूर्वं सनातनम् ।
एकविंशतिभेदेन ऋग्वेदं कृतवान् मुनिः ॥ ६० ॥
शाखानां तु शतेनैव यजुर्वेदमथाकरोत् ।
सामवेदं सहस्रेण शाखानां तु प्रभेदतः ॥ ६१ ॥
आथर्वणमथो वेदं बिभेद नवकेन तु ।
अथ शिष्यान् स जग्राह चतुरो वेदपारगान् ॥ ६२ ॥

58a) G4,T1,T2. भ० for श०
58b) D1,G3,M2. भवे० for ऽभव०
58c) G. ०नः for ०नम्
58) D,D4. Om.
59c) G4. अप्रकाशो यथा० } for अप्रकाशयदा०
T1. प्रकाशपिण्डमा० }
G7. ०शम् for ०श०
59d) M. ०र्थप्रकाशकम्॥ } for ०र्थावतसकम्॥
M1,M2,T1. ०र्थविभासकम्॥
G7. ०र्थप्रभासकम्॥
59) D,D4,T2. Om.
60d) D4. तु विभेदितम्॥ for कृतवान् मुनिः॥
T1. पुनः॥ for मुनिः॥
60) D,D4,T2 Om.
61b) D5,M2. ०वेंद त० for ०वेंदग०
61d) T1 च वि० for तु प्र०
61) D,D4. Om.
62a) D1,D2,D6,G,G1,G2, G5,G6,G7,T,T2. } अ० for आ०
G3. ०तो for ०थो
62) D,D4. Om.

सुमन्तुं जैमिनिं चैव वैशम्पायनसंज्ञितम् ।
पैलसंज्ञमथ प्राज्ञं व्यासः सत्यवतीसुतः ॥ ६३ ॥
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
यजुर्वेदप्रवक्तारं वैशम्पायनमेव हि ॥ ६४ ॥
जैमिनिं सामवेदस्य सुमन्तुमितरस्य च ।
ऋग्वेदस्य तु शाखानां श्रावकानेकविंशतिम् ॥ ६५ ॥
जग्राह वेदविच्छ्रेष्ठः कृष्णद्वैपायनो मुनिः ।
यजुःशाखाशतस्यापि श्रावकाणां शतं मुनिः ॥ ६६ ॥

63a)	G5.	सुमन्तुर्जैमिनिश्चैव for सुमन्तु जैमिनि चैव
	G4.	बैल्वम् for चैव
63b)	G7.	०मेव च ifor ०सञ्जितम् ।
63c)	G2,G5.	०ज्ञा for ०ज्ञम् , G6. Om. ०मथ ;
	M,M1,M2,T1.	०ज्ञ महाप्राज्ञम् for ०ज्ञमथ प्राज्ञम्
63)	D.	Om.
64b)	G5.	सजग्राह for जग्राह स
64d)	D6,M,M1,M2,T1.	च for हि
64)	D,D4.	Om
65b)	T1.	तु for च
65ab)	G4.	Om सामवेदस्य सु
65c)	D1,D2,D6,G,G2,G5,G6,G7,T,T2.	०या· } for नाम्
	D5,G1,G3,G4	०याम् } for नाम्
	T1	Om. तु
65d)	T2	०कस्यैक० for ०कानेक०
	D1,D5,M1	०तिः for ०तिम्
65cd)	T1.	शाखास० for शाखाना
65)	D,D4	Om.
66a)	D3,D5,D6,G3,G4,M,M1,M2.	जगृहे for जग्राह
	M,M1,M2.	०ष्ठाः } for ०ष्ठः
	G7	०ष्ठ } for ०ष्ठः
	T1.	०ष्ठान् } for ०ष्ठः
66c)	M.	यजुर्वेदस्य शाखानाम् for यजुःशाखाशतस्यापि
66cd)	G2,G5.	Om.
66)	D,D4.	Om.

श्रद्धया परिजग्राह पराशरसुतः स्वयम् ।
सामशाखासहस्रस्य मुनीनां तु सहस्रकम् ॥ ६७ ॥
जग्राह मुनिशार्दूलः साक्षात् सत्यवतीसुतः ।
आथर्वणस्य वेदस्य शाखाभेदप्रवर्तकान् ॥ ६८ ॥
मुनीन् जग्राह सर्वज्ञः पाराशर्यो नवास्तिकान् ।
वेदानामपि शाखानां श्रावका ये मुनीश्वराः ॥ ६९ ॥
सर्वे तेऽहिंसयोपेताः सत्यास्तेयदयान्विताः ।
ब्रह्मचर्यार्जवाभ्यां च क्षमाधृतिमिताशनैः ॥ ७० ॥
शौचसन्तोषदान्तैश्च तपसा लज्जयापि च ।

67b) D1,G3. पा० for प० ; G4. Om. ०राशर

67c) D5,D6,G,G1,G4,G6,G7,M1,M2T,T1. ०म्र' for ०म०

D3. साम्नः सहस्रशाखस्य } for सामशाखासहस्रस्य

G3. साम्न' शाखासहस्र च }

67d) D3,D5,D6,G3,G4,M,M1,M2,T1,T2. च for तु

67) D,D4. Om.

68c) D1,D2,D4,D6,G,G1,G2,G5,G6,G7,M,M2. अ० for आ०

68) D. Om.

69b) D3,D4,D5,D6,G,G1,G2, G3,G5,G6,G7,T. } ०का. ॥ for कान् ॥ ; G4. Om. वास्तिकान्

69) D. Om.

70a) D4. ते हिसयापे० for तेऽहिसयोपे०

70b) G1,G7. ०या० for ०य०

70c) D1. ०तवा० } for ०र्जवा०

T. ०श्रमा० }

70d) G3. ०क्षे for ०क्ष०

G3. ०मिता. } for ०मिता०

D5. ०विना० }

70) D. Om.

71a) D4,G3,G4,M1,M2T2. ०दानै' }

M. ०मानैः } for दान्तैः

D5. ०गानै' }

71b) G7. Om. लज्ज ; G4. Om. यापि च ; T. प्रज्ञ० for लज्ज०

71ab) M1. Om. न्तैश्च तप ज्जयापि

आस्तिक्येन च मत्या च सिद्धान्तश्रवणेन च ॥ ७१ ॥
व्रतेन च जपेनैव संयुक्ताः सर्वदादरात् ।
स्वस्तिकाद्यासनोपेताः प्राणायामपरायणाः ॥ ७२ ॥
प्रत्याहारपरा नित्यं धारणाध्यानसंयुताः ।
समाहितधियः सम्यक् शिवभक्तिपरायणाः ॥ ७३ ॥
शिवार्चनपरा नित्यं वेदसिद्धेन वर्त्मना ।
तीर्थसेवापरा नित्यं मातृशुश्रूषणे रताः ॥ ७४ ॥
पितृशुश्रूषणोपेताः सर्वदातिथिपूजकाः ।
अभ्यागतानां सर्वेषां पूजकास्तु विशेषतः ॥ ७५ ॥

71c)	D1.	अ० for आ० ; G4. Om. मत्या च
71d)	G3.	रता ॥ for ०न च
71)	D	Om.
72a)	G6.	प्रत्ते० for व्रते० ; M. दमे० for जपे०
72b)	G7	०ण० for ०णा० ; M1. Om. रायणा
72)	D.	Om.
73a)	M1.	Om. प्रत्याहारपरा ; T1. Om. नित्यम्
73b)	G3. G7.	वेदसिद्धेन वर्त्मना धरणाद् ध्यानसयुतः। } for धारणाध्यानसयुताः।
	G5T2.	०ण० for ०णा०
73ab)	T1	Om नित्य धारणाध्यानसयुता ।
73c)	D5	धरा० for समा०
	M.	०मन for ०धिय·
73cd)	G3,T1.	Om
73)	D,G1	Om.
74ab)	G3.	Om.
74c)	M.	०रता for ०परा ; M1. Om तीर्थसे
74)	D.	Om.
75b)	D5,G,G1,G2,G5,G6,T.	०था० for ०दा० ; G7. ०र्वे for ०र्वदा०
75ab)	G3.	Repeats verse No. 73 above between verse No. 75ab and 75cd.
75c)	D5.	०सका० for ०गता०
75d)	G4.	Om. जकास्तु
75)	D,T1.	Om.

आर्तानामपि सर्वेषां मातृवद्रक्षका भृशम् ।
कामक्रोधमहालोभामर्षमोहविवर्जिताः ॥ ७६ ॥
रोषमोहविनिर्मुक्ता दम्भदर्पादिवर्जिताः ।
कुत्सिताचारनिर्मुक्ताः कुशास्त्रार्थपराङ्मुखाः ॥ ७७ ॥
परापवादनिर्मुक्ताः परद्रोहविवर्जिताः ।
सुतर्कसहिता नित्यं कुतर्कविमुखास्तथा ॥ ७८ ॥
निद्रालस्यादिनिर्मुक्ता निर्द्वन्द्वा निरुपद्रवाः ।
निरस्ताशेषदोषाश्च समस्तगुणभाजनाः ॥ ७९ ॥
शिखाजटाः सर्वजटा अजटा आस्तिकोत्तमाः ।

76c) D1D2,G,G1,G2,T. ०दा० for ०हा०
D3,D4,D5,D6,G2,M,M1,M2. लोभ० } for ०लोभा
G3,G4,T2. मोह० }
76d) D3,D4,D5,G4,M,M1,M2,T2. ०हर्ष० } for ०मर्ष
G3. ०मद० }
D1. ०दोषा०
D2. ०दोष०
D5,D6,G,G1,G2,G4,G5,G6,G7,M1,M2,T2. ०रोष० } for ०मोह०
G3. ०मान०
M. ०शोक०
76) D,T1. Om.
77a) D5,D6,G4,M,M1,M2. लोभ० for रोष
D4. ०शोक० } for ०मोह०
D3. ०लोभ० }
77d) D6. अ० for कु०
D5. ०स्त्रे च for ०स्त्रार्थ०
77) D,D1,D2,G,G1,G2,G5,G6,G7,T,T1,T2. Om.
78b) D6. ०विनिव० for ०विव०
78ab) D1,D2,G,G1,G2,G5,G6,G7,T,T2. Om.
78) D,D1. Om.
79a) G1,G7. Om.
79ab) D. Om.
79) T1. Om.
80b) D3,D4. ०रा० for ०टा०
80ab) T1. Om.

अग्निरित्यादिभिर्मन्त्रैर्भस्मदिग्धकलेवराः ॥ ८० ॥

ऋषय ऊचुः

भगवन्! सर्ववेदान्तैः किं वस्तु प्रतिपाद्यते? ।
तस्य किं लक्षणं साक्षात्? कानि नामानि तस्य तु? ॥ ८१ ॥

कीदृशं तत्परिज्ञानम्? केन तज्ज्ञायतेऽचिरात् ।
केन मुक्तिः? पराङ्गानि कानि ज्ञानस्य? सत्तम! ॥ ८२ ॥

कस्मिन् सर्वाणि कर्माणि पर्यवस्यन्ति वस्तुनि? ।
वेदान्तेषु समस्तेषु किं वा सारतरोत्तमम्? ॥ ८३ ॥

ब्राह्मणस्य विशेषेण वेदेषु सकलेषु च ।
को धर्मो विहितः साक्षादन्यस्य च मुनीश्वर! ॥ ८४ ॥

80c) T1. Om. अग्निरित्या

80d) D,D1,D2,D5,D6,G,G1,G2,G4, G5,G6,G7,M,M1,M2,T,T1,T2. } ०तनूरुहाः ॥ for ०कलेवराः ॥

Before 81a) D,D3,D6,G,G1,G2,G4,G5,G6,G7,T,T2.. ऋषयः- } for ऋषय ऊचुः ।
M1. मुनयः- }

D5,G3,M,M2,T1. Om. ऋषय ऊचुः-

81b) D6. ०प० for ०पा०?

81c) D1,D2. ब्रूहि for साक्षात्

82a) T2 ०त्त्वावि० for ०त्परि० ;

G4. Om. त्परिज्ञानम् ?

82b) D5. ते० for के० ; D. न for तत् ;

D1,D2,D3,D5,G,G5,M2,T,T1,T2 जा० for ज्ञा०

82c) D,G3,M. व०for ष०

82d) D3. ०त० for ०न०

83b) M1. Om. पर्यंत

83ab) G4. Om. र्माणि प

83d) D5. सरोत्तमम् ॥ } for ०तमोत्तमम् ?॥
G3,G4. मथोत्तमम् ॥
G5. सार नरोत्तमम् ॥

84b) G6. ०ष्वपि। for ०षु च। ; M,M1. Om. च

84ab) G4. Om.

कीदृशो धर्मसंज्ञस्तु? कीदृशोऽधर्मसंज्ञकः? ।
सर्वं नः सङ्ग्रहेणैव ब्रूहि कारुणिकोत्तम! ॥ ८५ ॥

सूत उवाच

एवं मुनीश्वरैः पृष्टः कृष्णद्वैपायनो मुनिः ।
उवाच सकलं सम्यक् क्रमेण करुणाबलात् ॥ ८६ ॥

श्रीवेदव्यास उवाच

शिवस्वरूपं वेदान्तैः समस्तैः प्रतिपाद्यते ।
तद्रूपं सत्यविज्ञानसुखानन्दैकलक्षणम् ॥ ८७ ॥
शिवः शम्भुर्महादेवस्तत्सदोमीश्वरः परः ।

85b) T1T2. ०ज्ञितः । for ०ज्ञकः? ॥
85d) D. वक्तुमर्हसि सत्तम ॥ for ब्रूहि कारुणिकोत्तम! ॥
G4. पौराणिको० for कारुणिको०
Before 86a) D5,G,G1,G2,G3,G4,G6,G7,M,M1,M2,T,T1. सूतः- } for सूत उवाच-
G5. श्रीसूतः- }
T2. Om. सूत उवाच-
86a) G7,T2. ०रः for ०रैः ; G6. प्रष्टुम् for पृष्ट
86b) G4. Om.
86c) T1. वचनम् for सकलम् ;
G4. Om. उवाच सकलम्
D1. ०म्य० for ०म्यक्
86d) D1. क्रूर्मे for क्रमे०
86cd) D4. Om.
Before 87a) D,D3,D4,G4,T1,T2. व्यासः- } for श्रीवेदव्यास उवाच-
G,G6. श्रीव्यासः- }
D5. श्रीवेदव्यासः-
G3 Om. श्रीवेदव्यास उवाच-
87c) M. ०ज्ज्ञेयम् for ०द्रूपम् ; G3. तु for ०त्य०
D5,G4,T2. ०नम् for ०न०
87d) D1,D2. ०मुखानन्तै for ०सुखानन्दै०
88a) D. स्वयम् for शम्भुः
88b) D. स त० for तत्स० ; T2. ०ता० for ०दो०
G,M,M1,M2,T,T1,T2. ०रम् for ०रः ।

ब्रह्मा रुद्रस्तथेशान ईश आत्मा हरोऽक्षरः ॥ ८८ ॥
एवमादीनि नामानि तस्यासाधारणानि वै ।
प्रत्यग्ब्रह्मैकताकारं विज्ञानं नेतरद्विजाः! ॥ ८९ ॥
वेदान्तैरेव विज्ञानं जायते नापरैः सदा ।
तेन मुक्तिः पराज्ञानि शमादीनि तपोधनाः! ॥ ९० ॥
सर्वकर्माणि विज्ञाने पर्यवस्यन्ति मुक्तिदे ।
अत्याश्रमसमाख्यं यत् व्रतं पाशुपतं परम् ॥ ९१ ॥

88c) D,D1,D2,G4,G5,T2. ०ह्म for ०ह्मा
D3,D4,G3. विष्णु० for रुद्र०
T2. ०सदे० for ०स्तथे०
88d) M,M1,M2,T1. ०रम् for ०रः
88cd) T1. शानो भवादृश for शान ईश आत्मा
89b) G7,M,M2,T,T2. ०स्य for ०स्या०
89c) D. ०क्य० for ०क०
D1,D2,G,G1,G2,T. ०र for ०रम्
G5. ०ब्रह्मैकतैकान्त०
M. ०ब्रह्मैकतार हि } for ०ब्रह्मैकताकारम्
M1,M2,T1. ०ब्रह्मैकमाकारम्
89cd) D5. Om.
90a) D,D3,D4,D6,G,G1,G2,G3,G4, G5,G6,G7,M,M1,M2,T,T1,T2. } तत् for वि०
90b) M. नापरः } for नापरैः ; G4. Om.
T1. नेतरै·
T1. ०क्तेः for ०क्तिः
90c) G3,M,M2. व० for प० ; G4. Om
90d) T1. निबोधय for तपोधनाः! ॥
90) D5. Om.
91c) D. अत्याश्रमाख्य यत् प्रोक्तम्
G3,G4. यस्याश्रम समास्थाय
M,M1,M2. यत्याश्रम समास्थाय } for अत्याश्रमसमाख्य यत्
T2. यस्याश्रयं समास्थाय
D4. ०तद् for ०यत्
91d) D. तद्वै for व्रतम् ; M1. द्रु० for व्र०

वेदान्तेषु समस्तेषु तत् सारतममुत्तमम् ।
ब्राह्मणस्य विशेषेण धर्मोऽयमपरस्य च ॥ ९२ ॥

भूत्यैवोद्धूलनं यच्च त्रिपुण्ड्रस्यैव धारणम् ।
चोदनालक्षणो धर्मो निषिद्धोऽधर्म ईरितः ॥ ९३ ॥

चोदना सत्यमेवार्थं वदेन्नासत्यमास्तिकाः ।
चोदनायाः प्रमाणत्वं नैव सन्देहमर्हति ॥ ९४ ॥

निश्चितं जायते यस्माद्धर्मादिविषया प्रमा ।
तथा चोदनया नैव प्रमित्यनुदयः क्वचित् ॥ ९५ ॥

92b) G4. ०म for ०मम्
92ab) D4. Om.
92c) G3. ०णानाम् for ०णस्य
92d) G3 ०ऽय नाप० for ०ऽयमप०
92cd) G4. Om.
M1. Om. ०ण धर्मोऽयमपरस्य
93a) D5 यज्ञ० } for यच्च
M,M1 यस्य }
T2. यद्वत् }
93c) D5. ०णे for ०णो
93d) D. ०षेधो } for ०षिद्धो०
D5. ०षेद्धौ }
94a) M1. Om. दना सत्य
94b) M. वेदेना० for वदेन्ना० ; D. ०धर्म० for ०सत्य०
94c) D5. ०याम् for ०याः
M. ०णार्थम् } for ०णत्वम्
D4,G3 ०णत्वात् }
94d) G5 ०वम् for ०व
D. ०दिग्ध० for ०देह०
D4 ०मृच्छ० for ०मर्ह०
94cd) G4 Om.
95a) D. ०श्चितात् for ०श्चितम् ; D1. त० for य०
95b) M,M2 ०ये for ०या
95d) D. मी० for मि० ; T1. ०न for ०द

अधीतसाङ्गवेदस्य प्रमितिर्जायते यतः ।
जायते हाविपर्यस्ता प्रमा चोदनया खलु ॥ ९६ ॥

मानान्तरानवष्टब्धविषया खलु चोदना ।
प्रमाणान्तरसंवादापेक्षा नास्त्येव सर्वथा ॥ ९७ ॥

स्वतःप्रमाणभूता हि चोदनातीन्द्रियार्थगा ।
कर्मभागस्तु वेदस्य साध्यधर्मादिगोचरः ॥ ९८ ॥

वेदान्ताः सिद्धवस्त्वेकविषया न क्रियापराः ।
सिद्धरूपं परं ब्रह्म स्वयमानन्दलक्षणम् ॥ ९९ ॥

आनन्दः पुरुषार्थो हि तत्र मानं तु चोदना ।
पुरुषार्थेऽस्ति तात्पर्यं वेदस्य खलु सत्तमाः! ॥ १०० ॥

96a)	G.	०वेदसाङ्ग० for ०साङ्गवेद०
96b)	T1.	जायते प्रमिति० for प्रमितिर्जायते ;
	D1.	त०for य०
96c)	T2.	०न्ते for ०ते
	D6.	०द्य } for हि
	G4.	हि }
	D5.	०पि० for ०वि०
96cd)	M1.	०स्तप्र० for ०स्ता प्र०
	G4	Om. ०स्ता प्रमा चोदनया खलु ॥
97a)	G4.	Om. ०मानान्तरान
97ab)	G3.	Om.
97d)	D1,D5,G1.	०प्रे० for ०पे०
	D.	सर्वदा } for सर्वथा
	T1.	चोदना }
98d)	D.	०नि० for ०दि० ; G. ०रा for ०रः
99a)	M.	०न्तसिद्धवस्त्वैक० for ०न्ताः सिद्धवस्त्वेक०
99b)	M.	०विषयो न क्रियापरः for ००विषया न क्रियापराः।
99ab)	G4	Om.
99d)	D.	पर० for स्वय०
100a)	G3.	०ऽस्ति for ०हि
100c)	G3.	०र्थो for ०र्थे

स्वार्थे तात्पर्यवद्वाक्यं प्रमाणं सुतरां खलु ।
साध्यस्य पुरुषार्थस्य विनाशस्य च संनवात् ॥ १०१ ॥

तथा सातिशयत्वाच्च ब्रह्मविज्ञानशेषता ।
सर्वं सातिशयं सौख्यं शेषोऽनतिशयस्य हि ॥ १०२ ॥

अतः शेषि परं ब्रह्म सच्चिदानन्दलक्षणम् ।
एक एव हि वेदार्थः सत्यमेव मयेरितम् ॥ १०३ ॥

अस्य वेदस्य सर्वज्ञः कल्पादौ परमेश्वरः ।
व्यञ्जकः केवलं विप्राः! नैव कर्ता न संशयः ॥ १०४ ॥

101a) D3. ०र्थ० for ०र्थे
101b) T1. वेदस्य for प्रमाणम्
101ab) G4. Om. त्पर्यवद्वाक्य प्रमाण सुतरा खलु।
102a) M1. Om. तथा सातिशय
102b) D5. बहु० for ब्रह्म० ;
G7. ज्ञानन for विज्ञान०
T2. ०तः for ०ता
102c) D5. चा for सा० ;
D3. ०ख्य for ०ख्यम्
G4. Om. ०स्ता प्रमा चोदनया खलु ॥
102d) D,G3,T,T2. ०षानति० } for ०षोऽनति०
D5,G. ०षो नाति० }
103a) D3,D4. त० for अ०
T. Om. तः ;
D ०षम् } for ०षि
D1,D2,G,G1,G2,G4,M,M2. ०षी }
G4. Om. पर ब्रह्म
103b) G1. स चिदानन्दमद्वयम् for सच्चिदानन्दलक्षणम्।
G4. Om.
103c) G4 Om. एक एव ; M1. Om. एक ए
103d) D4,D6,T1. ०येरित. } for ०येरितम्
D5. ०योदितम् }
104a) T1. त for अ
104d) T1. महेश्वरः for न सशय ॥

अतोऽनन्तसुखं ब्रह्म विषयज्ञानकारणम् ।
चोदनामानमेव स्यात् सुसूक्ष्मं परिपश्यताम् ॥ १०५ ॥

सूत उवाच

एवमुक्त्वा मुनिर्व्यासः शिष्यानालिङ्ग्य सुव्रतान् ।
प्रणम्य साम्बमीशानं ययौ कैलासपर्वतम् ॥ १०६ ॥

मुनयश्च महात्मानः सर्वशास्त्रप्रवर्तकाः ।
प्रणम्य स्वगुरुं व्यासं वेदविज्ञानसागरम् ॥ १०७ ॥

वेदानध्यापयामासुर्मुनीन्द्रानास्तिकोत्तमान् ।
स्वाध्यायाध्ययनादेव तथैवाध्यापनादपि ॥ १०८ ॥

105a) D5,D6,G,G2,G5,G6,T,T1,T2 ०सुखब्रह्म } for ०सुख ब्रह्म
G1 ०सुखब्रह्मा }

105c) D. मान एवम् } for ०मानमेव
D4. ०नैव मानम् }
G5. ०यः for ०व ;
G4 Om. चोदनामानमेव

105d) D4,G3,G4,T2. ०द for ०प, the second

Before 106a) D5,G,G1,G2,G3,G4, G5,G6,M,M1,M2,T,T1. } सूत. - } for सूत उवाच -
G7. श्रीसूत - }
T2. Om सूत उवाच-

106a) M. ०श्रेष्ठ. } for ०व्यसिः
T1 ०श्रेष्ठा· }

106b) G2,G5 सवृ० for सुव्र०

107b) G4 Om.

107c) G4,G6. Om. प्रणम्य

108b) G2,G5,T ०पमा· for त्तमान्।

108c) T1. वेदस्या० for स्वाध्याया.
D5,M,M1. ०ध्यापना० } for ०ध्ययना०
D6. ०ध्यायना० }

108d) D1,D6,M. ०ध्ययना० for ०ध्यापना०

जायते शुद्धविज्ञानं खलु नान्येन हेतुना ।
अन्यहेतुसमुत्पन्नं न ज्ञानं न हि संशयः ॥ १०९ ॥
वेदविज्ञानलाभाय वेदानामुपबृंहकम् ।
पुराणमभ्यसेन्नित्यं ब्राह्मणो विगतस्पृहः ॥ ११० ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ १११ ॥
स्कान्दमेतद्विशेषेण पुराणं सर्वशोभनम् ।
अभ्यसेच्छ्रद्धया नित्यं संसारं तरति क्षणात् ॥ ११२ ॥
विशेषेणाभ्यसेन्नित्यं ब्राह्मणः सौरसंहिताम् ।

109b) D1 ०नेन० for ०न्ये ; G4 Om. न्येन

109c) M,T2. अस्य } for अन्य० ; D. ०तोः for ०तु
T1. तस्य }

109cd) D,D1,D2,G,G1,G2,G5 ०त्रमज्ञानम् for ०त्र न ज्ञानम्

110b) D3,D4,G3. ०बृहणम् } for ०बृहकम्
D5. ०बृहितम् }

110d) D5,G,G2 ०णोऽपि for ०णो वि०

T ०णा विगतस्पृहा ॥ for ०णो विगतस्पृह ॥

111b) D,D4,D5,G,G1,G2,G3, G4,G5,G6,G7,M,M2,T1,T2 } ०श for ०शो

M1 Om. वशो म

111c) M2. चेति for चैव

112a) T1. ०मेव वि० for ०मेतद्वि०

112ab) D,D1,D2,D3,D4,D5,D6,G, G1,G2,G3,G4,G5,G6,T,T1,T2. } Om.

112d) G6. ०रान् for ०रम्

M. दह० } for तर०
M1,T2. हर० }

M2. हन्ति तत्क्ष० for तरति क्ष०

113a) M1 Om शेषेणाभ्यसेन्नित्यम्

113b) D5,G7. ०णाः for ०ण· ;

G3. ०सू० for ०सौ

सहस्रकिरणः सूरः सर्वमिष्टं प्रयच्छति ॥ ११३ ॥
श्रावयेच्चतुरो वर्णान् सश्रद्धं संहितामिमाम् ।
श्रावकः सर्वपापेभ्यो मुच्यते सत्यमीरितम् ॥ ११४ ॥

॥ इति श्रीस्कान्दे पुराणे सौरसंहितायां प्रथमोऽध्यायः ॥

113c) D,D3,D4,M,T1,T2. ०र्यः for ०र·
113d) D सर्वाभीष्टदम् for सर्वमिष्टम्
114b) T1: श्रद्धया ब्राह्मणः सदा। for सश्रद्ध संहितामिमाम्।
114c) M1. Om. कः सर्वपापेभ्यो
114d) T. ०त· ॥ for तम् ॥
Colophan)
G2,G6,G7 इति
G1,T. इति श्री
D4. इति स्कान्दे
D3,T1,G. इति श्रीस्कान्दे
D5,G3,G4,M,M1,M2. इति स्कान्दे पुराणे
D,D2,G5. इति श्रीस्कान्दे महापुराणे
D1. इति श्रीस्कान्दे महापुराणे
} for इति श्रीस्कान्दे पुराणे
G3 मू० for सौ०

॥ अथ द्वितीयोऽध्यायः ॥

वालखिल्या ऊचुः

कथं योगीश्वरः सूरं प्राप्य वेदार्थमुत्तमम् ।
लब्धवानाशु नः सूत! वद तत् सङ्ग्रहेण तु ॥ १ ॥

सूत उवाच

पुरा हिमवतः पार्श्वे योगी परमधर्मवित् ।
याज्ञवल्क्यो महाधीमान् लोकानां हितकाम्यया ॥ २ ॥

सहस्रकिरणं देवं समस्तजगदाश्रयम् ।
सुरासुरभुजङ्गाद्यैर्मुनिभिश्च सुसेवितम् ॥ ३ ॥

Before 1a)	D1,D2.	श्रीवालखिल्या } for वालखिल्या ;
	G6.	वालखिल्यः }
	D6.	उवाच for ऊचुः
	D5,G,G1,G2,G5,G7,T.	Om. ऊचुः
1a)	D	सौरात् }
	G4,G6,G7,M1,T2.	सौरम् } for सूरम्
	D5.	सारम् }
	D1,D2,D3,T1.	सूर्यम् }
1ab)	D4.	याज्ञवल्क्य· सूर्यात् कथ वेदार्थ प्राप्तवानिति। for कथ योगीश्वरः सूर प्राप्य वेदार्थमुत्तमम्।
1c)	D,T1.	तत् for न
1d)	D	न· for तत् ; G2,G5. च for तु
1cd)	D4.	Om.
Before 2a)	D4,D5,G,G1,G2,G3,G4,G5, G6,G7,M,M1,M2,T,T1,T2 }	Om उवाच
2a)	G3	प्रान्ते for पार्श्वे
2abc)	D4.	पृष्ठे सावित्रीं चतुर्विंशतिलक्ष जजाप for पार्श्वे योगी परमधर्मवित्। याज्ञवल्क्यो म
2c)	T2.	०बुद्धि· for ०धीमान्
2d)	D4	Om.
3a)	D5,G3,G4,T2	०च० for ०कि०
3b)	M	०ल० for ०श्र०
3c)	G6.	Om. सुरा
3)	D4.	Om.

विलोक्य मनसा देवीं सावित्रीं वेदमातरम् ।
साक्षाद्रुद्रस्य देवस्य हरस्य प्रतिपादिकाम् ॥ ४ ॥
चतुर्विंशतिकं लक्षं जजाप विजितेन्द्रियः ।
ऊर्ध्वबाहुर्निराधारः पादाङ्गुष्ठाग्रनिष्ठितः ॥ ५ ॥
जपेन भगवान् सूरः प्रसन्नः प्रकटप्रभः ।
स्वयमाविरभूत् तस्य पुरतः परमेश्वरः ॥ ६ ॥
तं दृष्ट्वा सर्वलोकेशं तेजोराशिं दिवाकरम् ।
प्रणम्य बहुशः प्रीतस्तुष्टाव मुनिपुङ्गवः ॥ ७ ॥

4b) D6. देव० for वेद०

4c) D6 ०सदेव० for स्य देव०

M,M1,M2 सोम० } for देव०
T1 हेम० }

4d) D,D1 रह० for हर०

4) D Om.

5a) G7 सच्चतुर्विंशकम् } for चतुर्विंशतिकम्
M चतुर्विंशतिका }

5ab) D4. Om

5c) M ०हा० for ०धा०

5d) D1,G,G6. ०विष्टि० } for ०निष्ठि
D,D2,D3,D6,G1,G2,G4,G5, G7,M,M1,M2,T,T1,T2 ०विष्टि० }
D4. ०ङ्गुष्ठा प्रतिष्ठि० } for ०ङ्गुष्ठाग्रनिष्ठि०
D5. ०ङ्गुष्ठाङ्घ्रिविष्टि० }

6a) D4 तेने प्रसन्न । त स्तौति for जपेन भगवान् सूर·

G3 ०वे० for ०पे०

D1,D2,T1. ०र्य } for ०र
M2 ०त· }

6b) G2 ०न्न० for ०न·

D. ०र० } for ०ट० , D5 ०भु· for ०भ·
D5 ०ट }

6d) D4 Om , T1 प्रसन्न· for पुरत

6cd) D4 Om.

7a) G1 स्वर्ग० for सर्व०० ; G3,T1. ०देवे० for ०लोके०

7b) T1. भानुमन्तम् for तेजोराशिम्

7d) D,D5 ०वा for ०व·

7) D4. Om.

याज्ञवल्क्य उवाच

आदित्यं सर्वलोकेशं जगतामार्तिहारिणम् ।
सदा सन्निहितं देवं नमामि त्वामहर्निशम् ॥ ८ ॥
रविरित्यनिशं वाचा जपन्ति भुवि ये जनाः ।
तेषामिष्टप्रदातारं नमामि त्वामहं प्रभो! ॥ ९ ॥
विरोचनं सदा दान्तं संसारस्य निवर्तकम् ।
भगवन्तं महादेवं भवानीसहितालयम् ॥ १० ॥
सहस्रकिरणं सम्यग्ज्ञानगम्यं परात् परम् ।
साक्षिभूतं समस्तस्य नमामि त्वामहर्पतिम् ॥ ११ ॥

Before 8a)	D,D3,D5,G,G1,G2,G3,G4, G5,G6,G7,M,M1,M2,T2.	याज्ञवल्क्यः for याज्ञवल्क्य उवाच
	D4	Om. याज्ञवल्क्य उवाच
8a)	M.	०भूते० for ०लोके०
9a)	D	०मि० for ०रि०
9b)	D5.	विज० for भुवि
9d)	T1	०ह ० for ०हम्
9cd)	M1	Om. तार नमामि त्वा
10a)	D5.	शा० for दा०
	T1	भा० for दा०
	M,M1,M2	भातम् for दान्तम्
10b)	G5	वि० for नि०
10c)	D,G4,M1,T2	०न्तमहम् for ०न्त महा०
11b)	T1.	०ज्ञानसार परापरम् for ०ज्ञानगम्य परात् परम्
11d)	D3,D5,D6,G4,G5,G7, M1,M2,T1,T2.	०महर्पते
	G,G1,G6,T.	०महस्पते
	M.	०महप्पते
	D,G3	०महर्पतिः
	G3.	०मह स्पते
	D1,D2	०मह स्वते

(11d) for ०महर्पतिम्

सर्ववर्गानुगं देवं साक्षादेव त्रयीमयम् ।
समस्तजगतो मूलं नमामि त्वामहं सदा ॥ १२ ॥

भानुमन्तं भगं नॄणां भवभीतिविमर्दनम् ।
भावनारहितं साक्षात् प्रत्यक्षं त्वां नमाम्यहम् ॥ १३ ॥

प्रद्योतनं परं तत्त्वं परतत्त्वप्रकाशकम् ।
पवित्रं परमं साक्षान्नमामि त्वामहं सदा ॥ १४ ॥

भास्करं परमार्थार्थभासकं भवभेषजम् ।
प्रणमामि महाभक्त्या परेशं त्वामहं सदा ॥ १५ ॥

12a)	G7.	सर्वाविभासकम् } for सर्ववर्गानुगम् ;
	T1.	सर्वगमानुगम् } for सर्ववर्गानुगम् ;
	M2.	०स० for ०व०
12b)	D6.	०देव०
	G	देवम् } for ०देव , G4 ०हम् for ०यम्
	G1.	देवा० } for ०देव , G4 ०हम् for ०यम्
12c)	M.	०ताम् for ०तो
13a)	D1,D2,G,G1,T.	०मूलम् for ०मन्तम्
	G2	०गत्राणाम्
	G5.	०गत्राणम् } for ०ग नॄणाम्
	D1,D2,G,G1	०ग त्रीणाम् } for ०ग नॄणाम्
13c)	D5	क्षा० for भा० ; T1. ०स० for ०र०
13)	G4,T2.	Om
14a)	D	०न० for ०नम् ;
	D3,D4.	०त परमम् for ०तन परम्
14d)	D,D5,G3,M,M2	प्रभो } for सदा
	D3,D4,D6,M1.	विभो } for सदा
14)	G4,T2.	Om.
15a)	D	०ख्यार्थ० for ०र्थार्थ०
15b)	D3.	०यकम् } for ०सकम्
	D4,G3.	०वकम् } for ०सकम्
15c)	G2,G5	०मत्या for ०भक्त्या
15d)	M2.	परमेश० for परेश त्व० ; D6 विभो for सदा
15)	G4,T2.	Om.

सूत उवाच

एवं मुनिवरः स्तुत्वा भगवन्तं दिवाकरम् ।
अपृच्छदखिलं धीमानाम्नायहृदयङ्गतम् ॥ १६ ॥

भगवानपि सर्वेषामभीष्टसकलप्रदः ।
यथावत् सर्ववेदार्थं प्रोवाच मुनये तदा ॥ १७ ॥

श्रीभगवानुवाच

शृणु गुह्यतमं ज्ञानं वेदान्तोदरसंस्थितम् ।
यन्न देवा विजानन्ति यतन्तोऽपि यतीश्वराः ॥ १८ ॥

इदं विज्ञानमज्ञानं ग्रसत्यात्मनि कल्पितम् ।

Before 16a)	D3,D4,D5,G,G1,G2,G3, G4,G6,G7,M,M1,M2,T,T2.	सूत - } for सूत उवाच -
	G5.	श्री सूतः - } for सूत उवाच -
16a)	M,M2.	०नीश्वर० for ०निवर०
16c)	D.	पप्रच्छम० for अपृच्छद०
16d)	D	०त } for ०तम्
	D1,D2,G,G1,G2,G5,G6,G7,T.	०मम् } for ०तम्
17a)	G6.	Om. ०नापि स
17d)	D5	मुनिपुगवाः for मुनये तदा
	D6,M,M2.	स० } for त०
	M,T1	मु० } for त०
17)	D4	Om.
Before 18a)	D,M1,T1	भग for श्रीभग०
	D4.	श्रीभगवान् सूर्य० - } for श्रीभगवानुवाच -
	D5	रवि० - } for श्रीभगवानुवाच -
18a)	D	तमज्ञान० for ०तम ज्ञानम् ; T1 विप्र for ज्ञानम्
18c)	G3,G6.	वेदा for देवा
	D1,D2,D4,G,G1,G2,G5,T,T1	न जा० for विजा०
	G7.	वेद सुरश्रेष्ठा for देवा विजानन्ति
18d)	T1.	मुनीश्वरः for यतीश्वर०
18cd)	M	Om
19a)	G2,G5.	एवम् for इदम्
19b)	M1	०त्मवि० for ०त्मनि
19ab)	M	Om.

आत्मा नाम चितिः साक्षादनाद्यन्ता स्वयंप्रभा ॥ १९ ॥
आत्मनोऽन्यत्वविज्ञानं केवलं व्यावहारिकम् ।
सर्वतर्कप्रमाणानामगम्यं दुर्घटोद्भवम् ॥ २० ॥
अज्ञोऽस्मीत्येतदज्ञानं विभाति हि चिदात्मनि ।

19c)	D,D1,D2,D3,D6.	आत्मनामक्षतिः } for आत्मा नाम चितिः
	D5	आत्मानमावृतिः
	D6,G2.	आत्मानमचितिः
	G7.	आत्मान मचितिः
	M1,T1.	आत्मानात्मचितिः
	G6.	द्यु० for चि०
19d)	D1.	०त्रा० for ०ना०
	D5.	०दनाद्या स्वयम० for ०दनाद्यन्ता स्वयम्
	G,G2,G5.	भो० for भा
20a)	D,D1,D2,D3,D6.	आत्मन्यात्मत्व० } for आत्मनोऽन्यत्व०
	G,G1,G2,G6,G7,T	आत्मन्येव त्व०
	D4,G3.	आत्मेतर वा०
	D5.	आत्मान वापि
	G4,T2.	आत्मानुरूप०
	M,M1,M2	आत्मन्यपास्त०
	T1.	अनात्मन्यस्त०
20b)	G3	०ल० for ०लम्
	D5	व्यवहारितम् } for व्यावहारिकम्
	G4,T2.	व्यवहारिकम्
20c)	D5.	०भ्या for ०ना०
20d)	D5	०र्गमो० for ०र्घटो०
21a)	T1.	अविभाति for अज्ञोऽस्मीत्ये०
	D,D1,D2,D3,D5,D6,G,G1, G2,G5,G6,M,M1,M2,T.	०स्मीति तद०
	D4	०स्मीति यद० } for स्मीत्येतद०
	G3	०स्तीति तद०
	G7.	०स्मीत्येतदा
21b)	G5.	विभातीह } for विभाति हि
	T1	सत्यानन्द०

एतद्रूपातिरेकेण न तदस्ति कदाचन ॥ २१ ॥
महादेवप्रसादेन सुसूक्ष्मं परिपश्यताम् ।
प्रकाशाव्यतिरेकेण जायते तत्प्रकाशवत् ॥ २२ ॥
अज्ञानाश्रयमात्मानं चिद्रूपं केवलं विना ।
कल्पयन्ति भ्रमादन्ये तत्त्वानि च ततः परम् ॥ २३ ॥
यानि तत्त्वानि कल्प्यन्ते शुद्धचिद्रूपतः परम् ।
तानि वास्तवभेदेन नैव भिन्नानि सत्तम! ॥ २४ ॥
अभावादेव भेदस्य वास्तवस्य निरूपणे ।
एकत्वेन विरुद्धत्वाद्भेदो नैकस्य वस्तुनः ॥ २५ ॥

21d)	D5.	०दा for ०द ; T1 विभाति for तदस्ति
21cd)	M1.	Om. द्रूपातिरेकेण न तदस्ति कदा
22b)	D1.	सूक्ष्म च for सुसूक्ष्मम् ; D3,D4,G3 ०द्दे० for ०प०
22c)	D5,T2..	प्राकाश० } for प्रकाशा०
	G4.	प्रकाश० } for प्रकाशा०
	M,M2,T1	०भिचारेण for ०तिरेकेण
22d)	D,D6	ज्ञायते } for जायते
	M,T2.	जायन्ते } for जायते
	G2,G5.	०र्कप्रकाश० } for तत्प्रकाश०
	G6.	०तत्तप्रकाश० } for तत्प्रकाश०
	T1.	हि प्रकाश० } for तत्प्रकाश०
23a)	M1.	Om. ०मात्मानम्
23b)	D1,D2.	०पात् for ०पम्
23c)	T1.	विभान्ते विभ्रमा० for कल्पयन्ति भ्रमा०
24a)	D1,D5,G5	०ल्प० for ०ल्प्य०
24b)	D5.	०द्धि० for ०द्ध० ; D5. ०तत्परम्। for ०तः परम्।
25a)	D1.	मेय० } for भेद
	D5.	देव० } for भेद
25b)	G,G1,G2,G6,T	०व्य० for ०व०
25c)	D5.	नि० for वि०
25d)	G4.	वे० for भे० ; D1,D5 ०त for ०न·
	T1.	०द्भेदेनैकेन वस्तुना। for ०द्भेदो नैकस्य वस्तुन ।

द्वयोर्भेदो न भेदस्य प्रवेशे सति हि द्वयम् ।
भेदान्तरेण भिन्नत्वे एषा तुल्या गतिर्यतः ॥ २६ ॥
यानि भिन्नानि तत्त्वानि तानि चिद्रूपतस्ततः ।
नैव भिन्नानि चिद्रूपाच्चिद्रूपं भिद्यते कथम्? ॥ २७ ॥
वैशेषिकेण रूपेण चितश्चिन्नैव भिद्यते ।
तच्च वैशेषिकं रूपं चितो भिन्नं भवेद्यदि ॥ २८ ॥

26a) T1. त० for द्व० ; G5,M,T1. ०देन for ०दो नः
D,D6. ०दः स्यात् for ०दस्य
26b) T1. त्वया for द्वयम्
26c) T1. यथा० } for भेदा० ; D1,D2. तुल्य० for भिन्न०
T2. वेदा० }
26d) D. तुल्या गतिरिय तु न ॥
D1,D2,D6,G,G1,G7. ह्येषा तुल्या गतीरियम् ॥
T. ह्येषा तुल्या गतिरियम् ॥
D3. ०प्येषा तुल्या गतीरियम् ॥
D4. ०प्येषा तुल्या गतिस्त्वियम् ॥
G5. ह्येषा तुल्यगतिर्ह्यियम् ॥
G2. ह्येषा तुल्या गतिर्ह्यगम् ॥
G3. ह्येषा तुल्या गतीरथः ॥
G6 ह्येषा तुल्या गतीरितम् ॥
M. ०प्येषा तुल्या गतिर्बुधाः ॥
M1. ह्येषा तुल्या गतिर्बुधाः ॥
M2 ०प्येषा तुल्या गतिर्बुध ॥
T1. ह्येषा तुल्या गतिर्बुधः ॥
} for एषा तुल्या गतिर्यतः ॥
26cd) D5. Om.
27b) D. ०त स्म ता } for ०तस्ततः
D5,T1. ०तत्त्वतः
G3,M,M1,M2,T2. ०तः स्वतः
D6. ०तस्त्वतः
27d) D1. वि० for भि०
27cd) D1,D5. ०चिद्रू० for ०चिद्रू०
28b) M. ०तिश्चे० for ०तश्चि०
28c) G2. Om. रूपम् ; T1. ०त्र for ०च and भिन्नम् for रूपम्
28d) D1,D3. ०त्तो } for ०तो
T. ०ता }

चैत्यरूपं भवत्येव यथा कुड्यादि संमतम् ।
तथा सति चितो भेदः सर्वथा नैव विद्यते ॥ २९ ॥

अभिन्नं तच्चिदेव स्याद्भेदाभेदो ह्यसङ्गतः ।
अतस्तत्त्वानि भिन्नानि माययैव न वस्तुतः ॥ ३० ॥

सर्ववेदेषु चैतन्यं केवलं परमं पदम् ।
इतोऽन्यथा मतिः पुंसां मोहायैव हि केवलम् ॥ ३१ ॥

सर्वमानातिगामिन्या श्रुत्या यत् प्रतिपाद्यते ।
तद्विरुद्धतयैवार्थं प्रवदन्ति हि तार्किकाः ॥ ३२ ॥

29a) D,D1,D2,D3,D5,D6, G,G1,G2,G3,M1,M2. } चैत्यरूपम्
D4. चित्प्रसूतं यम् } for चैत्यरूपम्
G4,T2. चित्यरूपम्
D. ०वत्यद्य } for ०वत्येव
D3,D4,D5,G3,G4, M,M1,M2,T1,T2. } ०वेदेव
29b) T1. मल० for यथा
D5. ०र्यादि } for ड्यादि ; D1. ०मि० for ०म०
G5. ०ड्या हि
29d) M1,T1. ०दा for ०धा ;
M. भि० for वि०
30b) D. भेदोऽस्य.... for भेदाभेदो ह्य०
M,M1,M2. ०प्य० for ०ह्य
30d) G. ०न for ०तः
31a) D6,T1. ०देवे० for ०वेदे०
31b) G5. ०लस्य परम् for ०ल परमम्
G4,T1. प्रतिपाद्यते for परम पदम्
31c) G3 ०लम् for ०तिः
31cd) G4,T2. Om.
32a) G2,G5. ०शायि० for ०गामि०
32d) M. ०गृह्णीयाच्चैव बुद्धिमान्। for प्रवदन्ति हि तार्किकाः।
M2,T1. ०न्त्रि० for ०र्कि०

स्वतन्त्रा एव ते सर्वे न श्रुत्यर्थोपजीविनः ।
अतो वेदविरुद्धार्थं गृह्णीयान्नैव बुद्धिमान् ॥ ३३ ॥
यदेव सर्ववेदान्तैः सादरं प्रतिपाद्यते ।
तदेव परमं तत्त्वं न हि संशयकारणम् ॥ ३४ ॥
यदेव परमं तत्त्वं सच्चिदानन्दमद्वयम् ।
तदेव मायया भिन्नं विभाति जगदात्मना ॥ ३५ ॥
आकारा बहवः सन्ति मायाशक्तेः परात्मनः ।
तेषु कश्चिज्जगच्चित्रविवर्तस्यैव कारणम् ॥ ३६ ॥
कश्चिद्ब्रह्मविभागस्य कारणं कश्चिदास्तिक! ।
जीवभेदस्य चिच्छक्तिविभागस्य च कश्चन ॥ ३७ ॥
जगद्विवर्तनस्यैव कारणत्वेन यः स्थितः ।

33b)	D6.	०वनम् for ०विनः
	T2.	Om.
33cd)	T2.	Om.
33)	M.	Om.
34a)	D5.	०दै० for ०दे०
34b)	D5D6.	०पद्यते for ०पाद्यते
34d)	D1,D2.	नैव for न हि
34)	T2.	Om.
35a)	D5.	०दै० for ०दे०
35c)	T1.	विद्वन् for भिन्नम्
35)	T2.	Om.
36a)	T1	०रानिह पश्यन्ति for रा बहवः सन्ति
36c)	T1	०त्रम् for ०त्र०
36)	D,D1,D2,D3,D4,D5,D6,G,G1,G2,G3,G4,G5,G6,G7,T,T2.	Om
37b)	M,M1,M2.	०का for ०क!
37c)	T1.	तच्छक्तेः for चिच्छक्ति०
37)	D,D1,D2,D3,D4,D5,D6,G,G1, G2,G3,G4,G5,G6,G7,T,T2	Om.
38a)	D5,G3,G4.	अकारो for जगद्वि० ; G. ०क० for ०न०
38b)	G5.	०स्व० for स्थि०
	T1.	आकारत्वेन यत् for कारणत्वेन यः

आकारः स तु सत्त्वादिगुणाकारैस्त्रिधा भवेत् ॥ ३८ ॥
तेषु सत्त्वगुणादीषद्रजोमिश्रान्महानभूत् ।
तदुपाधिवशेनैव द्विधा सर्वेश्वरोऽभवत् ॥ ३९ ॥
सर्वज्ञश्चेक्षिता चेति न स्वतः पण्डितोत्तम! ।
सत्त्वोपाधिवशाद्रुद्रो भवेदेवेक्षिता तु सः ॥ ४० ॥
स एव तमसा विष्णुर्भवेद्ब्रह्मा रजोगुणात् ।
तेऽपि लोकोपकाराय भवन्ति बहुधा मुने! ॥ ४१ ॥

38c)	D3,D4	०रस्य for ०रः स ; G6. ०त्या० for ०त्त्वा०
38cd)	G7	०दिर्गु० for ०दिगु०
38)	T2.	Om.
39a)	D.	०णोन्मिश्रा० } for ०णादीष०
	G6.	०णादीषु० }
39b)	D.	विजानिष्ठा० } for ०द्रजोमिश्रा०
	M.	द्रजोयुक्ता० }
39c)	D.	०द्रू० for ०दु० ;
	M.	०शादे० for ०शेनै०
39d)	G6.	०द्वे० for ०द्वि०
	D1,D2,D3,D4,D5,D6,G3,G6.	०वेत्० for ०वत्
39)	T2.	)m.
40a)	D5.	०श्चो० for ०श्चे० ; G3. साक्षी for चेति
40b)	D5,G6,M2,T1.	०मः० } for ०म !
	M.	०माः }
40c)	G6.	०र्वो० for ०त्त्वो०
40d)	M.	०वत्येवो० for ०वेदेवे०
	G6.	०वो for ०वे ; The second G2,G5. ०नः for स·
40)	T2.	Om
41a)	D5	त for स
41b)	M,M1.	०ह्म for ०ह्मा
41d)	M1	Om. भव० and मुने !
	G6.	०वो for ०वे The second
	G2,G5.	०न· for स·
41)	T2.	Om.

रुद्रस्तेषु हरेरंशाल्लोकानां हितकाम्यया ।
हरिमन्यं सृजत्येष महाबलपराक्रमः ॥ ४२ ॥
ब्रह्माणं ब्रह्मणस्त्वंशादन्यं रुद्रः सनातनः ।
कुरुते विष्णुरप्येवं ब्रह्मापि कुरुते तथा ॥ ४३ ॥
रुद्रांशाद्रुद्रसृष्टौ तु रुद्रस्यैवाज्ञयैव तु ।
कुरुते सर्वलोकानामुपकाराय न स्वतः ॥ ४४ ॥
ब्रह्मविष्ण्वादिरूपेण रुद्रः स्वांशेन केनचित् ।
लोकानामुपकाराय स्वयं विप्र! स्थितो भवेत् ॥ ४५ ॥
विष्णुश्च लोकरक्षार्थं ब्रह्मरुद्रादिरूपतः ।
आज्ञया देवदेवस्य रुद्रस्यैव स्थितो भवेत् ॥ ४६ ॥

42c)	G6.	०षु for ०ष
42d)	D1,D2,T1.	०ममू for ०मः
42)	T2.	Om.
43a)	D5.	ब्राह्म० for ब्रह्मा० ; D4. ०श्चा० for ०स्त्व०
43b)	D4.	०द्र सनातनम् for ०द्रः सनातनः
43ab)	M1.	Om. णस्त्वशादन्य रुद्र' सना०
43c)	M.	०रित्ये० for ०रप्ये०
43)	T2	Om.
44a)	D.	०म० for ०सृ० ;
	G6.	Om. रुद्राशा
44b)	T	तत् for तु ;
	M1.	Om. व तु
44c)	D4,D5,G3,G4,M,M1,M2,T1.	०तः for ०ते
44)	T2.	Om.
45b)	T1.	०स क० for ०केन०
45d)	D,G3.	०प्रा and ०प्र ! ;
	G4.	०वत् for ०वेत्
45)	T2.	Om.
46b)	G4,G6.	०ह्मा for ०ह्म०
46d)	G4.	०स्ये० and ०स्यै० ;
	D4,G4.	०वत् for ०वेत्
46)	D5,T2.	Om.

तथा ब्रह्मापि रुद्रस्य नियोगादेव केवलम् ।
रुद्रविष्ण्वादिरूपेण माययैव स्थितो भवेत् ॥ ४७ ॥
ब्रह्मणश्च हरेरंशः स्थितो यो रुद्ररूपतः ।
स तु स्वांशस्य रूपस्य विधेयः स्याद्धरस्य च ॥ ४८ ॥
ब्रह्मविष्ण्वादिरूपेण त्वंशो रुद्रस्य यः स्थितः ।
स विधेयो भवेत् साक्षाच्छिवरूपस्य केवलम् ॥ ४९ ॥
महामोहवशेनैव हरिं ब्रह्माणमीश्वरम् ।

47a) M2. अथ for तथा ; D4. Om. रुद्रस्य
47b) D4. Om.
47d) D4,G4. ०वत् for ०वेत्
47) T2. Om.
48a) D4. ०शात् } for ०शः
D6. ०शे } for ०शः
G,G1,G3,G5,G7,M,M1,M2,T,T2. ०श० } for ०शः
48b) D. ०ताये for ०तो यो
48c) D3,D4. ०शिस्व० } for ०शस्य
D5,G4. ०शे स्व० } for ०शस्य
G3,T1. ०शस्व० } for ०शस्य
48d) D. यस्याध्व० for ०यः स्याद्ध ;
M2. ०र्म० for ०र०
48) T2. Om.
49b) T1. अ० for त्व०
49c) D. अ० for स०
49d) M,M2. त्वशी रुद्र० } for शिवरूप०
T1. स्वाशरूप० } for शिवरूप०
49) T2. Om.
50a) D,D6. ०वम् for ०व
50b) D6. ०मैश्व for ०मीश्व०
50c) D3,D4,G3. ०नु० for ०न्व० ; G3. ०दा for ०मम्
D,D2,D5,G,G1,G2,G4,G5,G6,G7,T. ०बुद्ध्या } for ०मर्त्या
D4. ०मर्त्यो } for ०मर्त्या
M,M1. ०मूर्त्या } for ०मर्त्या
M1. Om. ते च समम्

मन्वते च समं मर्त्या वृथाहो! मोहवैभवम् ॥ ५० ॥
स्वस्वातन्त्र्यवशेनैव हरः सर्वोत्तमोत्तमः ।
निहितो लोकरक्षार्थं भवेत् स्वांशेन केनचित् ॥ ५१ ॥
अविज्ञाय नरास्तस्य वैभवं मन्वते हरम् ।
निहीन इति ते सर्वे पाषण्डाः पापयोनयः ॥ ५२ ॥
श्रुतिस्मृतिपुराणानि समस्तानि क्वचित् क्वचित् ।

50d) D6,G,G1,G3,G6,G7,M,M1,M2,T1. हा for ०हो !
D1. मोहोह } for ०हो ! मोह०
T1. मोहस्य }
50) T2. Om.
51a) D1. स्वम् } for ०स्व
D4. तत् }
D स्वाशस्य } for ०स्वातन्त्र्य०
D6. स्वातन्त्र }
D3,D4,G3. ०बले० } for ०वशे०
D5. ०कोशे }
51c) D. निहिता
D5,D6,G,G1,G4,G6,T. निहीनो } for निहितो
D1. नही-
D2,G2,G3,G5,G7. न हीनो
D1. Om लो
51d) T1. ०वलम् for ०नचित् , M1. Om. न केनचित्
51) T2. Om.
52b) D3,D4,M2 ०न्य० } for ०न्व० ; G3,G5. ०रिम् for ०रम्
G3. ०नु० }
52c) D,G2,G3,G5,G7. न
G6. अ० } for नि०
M,T1. वि० }
D1. मित } for इति ; M. ०र्वं for ०र्वे
D2. ०मिति }
52) T2. Om.
53a) G4. Om. तिस्मृतिपुरा

तेषामंशांशिभावस्य विशेषमनवेक्ष्य च ॥ ५३ ॥
सामान्येनैव चोत्कर्षं चापकर्षं वदन्ति च ।
क्वचिच्च तानि निर्णीय प्रवदन्ति च सत्तम! ॥ ५४ ॥
प्रसादादेव रुद्रस्य प्रमाणानि यथा यथा ।
तथा तथा मनुष्याणां प्रकाशन्ते न संशयः ॥ ५५ ॥
मुनीनामपि देवानां तथान्येषामपि द्विज! ।
प्रसादादेव मानानि प्रकाशन्ते तथा तथा ॥ ५६ ॥

53c) M1. Om तेषा ;
D5,G2,G3,M. ०श० for ०शि०
53d) D,D3,D4,G3 ०षं for ०वं ;
M2 Om. च
53) T2. Om.
54a) D ०न्यम् for ०न्ये०
54b) D3,D4,G3. हि for च , G6 Om. च
54ab) D5 ०लोकर्षिश्चा० for चोत्कर्ष चा०
54c) M. तन्निर्णयेन for तानि निर्णीय
D1. निर्णाय
G5. निर्वीयम्
M1,M2. निर्णेन
T1 चैवैनम्
} for निर्णीय
54) T2 Om.
55b) D,G4 तथा for यथा, the second.
55c) G4. Om. ष्याणाम्
55cd) D Om.
55) T2 Om.
56b) D1,D2,D5,D6,G,G1,G2,G3, G4,G5,G6,G7,M1,M2,T,T1 } द्विजा ! । for द्विज ! ।
56ab) D4 तथा मुनिदेवगुरुप्रसादाच्च for मुनीनामपि देवाना तथान्येषामपि द्विज ! ।
56c) D1 ०सादेनै०
M2 ०काशादे०
} for ०सादादे०
56d) G4,T1. यथा for तथा, the first
56cd) D4 Om.
56) D,T2 Om.

प्रसादहीनाः पापिष्ठाः प्रमाणार्थं विमोहिताः ।
अन्यथैव विजानन्ति निर्णयाशक्तबुद्धयः ॥ ५७ ॥

विजानन्तीश्वरोत्कर्षं प्रसादादेव केवलम् ।
तेषामेव विनिर्मोक्षः संसारादचिरेण हि ॥ ५८ ॥

तत् तावत् तिष्ठतु ब्रह्मन्! उत्कर्षं शङ्करस्य तु ।
को विजानाति? को वक्ति? वैभवं तस्य सुव्रत! ॥ ५९ ॥

उक्तिर्घुणाक्षरन्यायात् सत्यापि स्यान्न वाथवा ।

57b) D,D3,D5,G3,G4,M,M1,M2,T1. ०र्थ० for ०र्थम्

57d) G4. ०र्णी० for ०र्ण० ; G7. Om.

57) T2. Om.

58a) D4. ०न्ति शिवो० for ०न्तीश्वरो० ; G4. Om. विजा

58c) G1. ह } for वि०
M. हि }

58) T2 Om.

59a) D. तत्वावतिष्ठतु }
D5. कर्तावतिष्ठति } for तत् तावत् तिष्ठतु
D6 तातावतिष्ठति }

59b) D. ०र्षो for ०र्षम्

D,D1,D2,G,G1,G2,G5,G6,G7,T. ब्रह्मणश्च } for शकरस्य
D6 ब्रह्मणोऽस्य }

D3,G3 हि } for तु
G5. यत् }

59ab) D4 उत्कर्ष वापकर्ष वा शिव एव जानाति। म०
for तत् तावत् तिष्ठतु ब्रह्मन्। उत्कर्ष शकरस्य तु।

59c) D1,D2,D5,G,G1,G2,G3,G5,G6,G7,T. वेत्ति for वक्ति ?

59d) D5. भैक्ष० for वैभ० ; T1. ०तम् for ०त !

59cd) ०दीया वाक् तु शिवप्रसादादेव निःसृता।
for को विजानाति ? को वक्ति ? वैभव तस्य सुव्रत ! ॥

59) D,T2. Om.

60a) D5,M1,M2. ०र्गु० for ०र्घु०

G4. उत्कीर्णा क्षरन्याया for उक्तिर्घुणा क्षरन्यायात्

60b) G. वास्तवा }
G7. चापि वा } for वाथवा
D5. वा यथा }

न जाने वाङ्मदीया तु स्वयं प्रसरति द्विज! ॥ ६० ॥
सर्वथा देवदेवस्य प्रसादादेव केवलम् ।
प्रसृता युज्यते मे वाक् कार्तार्थ्यविषया ततः ॥ ६१ ॥
श्रुत्या विरुध्यते नैव स्मृत्या तन्मूलयापि च ।
अतः प्रसादजन्यैव मदीया वाक् शिवस्य तु ॥ ६२ ॥

60c) D,G7. Om. वाङ्मदी ;
D5. ०तीक्षम् for ०दीया
G5., M. स्यात्, ०पि } for ०तु
60d) T1. ०ते for ०ति , D5. ०जाः ! for ०ज !
60) D4,T2. Om.
61b) D1. ०देनैव for ०दादेव ; M1. Om. दादेव के
61c) D,D1,D2,D3,D6,G,G1,G3,G6,G7,T,T1. युज्यतामेव
D5. ०र्यज्यतामेव
G4. यदद्यतामेव
G5. यदद्युतामेव
} for युज्यते मे वाक्
61d) D,D6,G1. कर्तार्थ०
D1,G3,G5 कर्त्रार्थ०
D5. क्रान्तार्थ०
G7. कर्त्ता स्व०
D2. कार्त्रार्थ०
M1. कान्यार्थ०
M2 नान्यार्थ०
M. नास्यार्थ०
} for कार्तार्थ्य ; D. न० for त०
61) D4,G4,T2. Om.
62a) G2. श्रुत्वा
G5. कृत्वा
} for श्रुत्या ; D3. ०ता for ०ते
T1. स्मृत्या
62d) D. मतिर्यावच्छि० for मदीया वाक् शि० ;
D1,D2,G,G1,G2,G3,G5,G6,G7,M,M1,M2,T,T1. छि० for शि० ; M1. Om. मदीया वाक्
62) D4,G4,T2. Om.

नैव पुण्येन मद्राणी प्रसूता नैव वेदनात् ।
प्रसादादेव साम्बस्य शिवस्यैव तु केवलम् ॥ ६३ ॥

प्रसादं कुरुते शम्भुः स्वतन्त्रः करुणाकरः ।
तेनैव प्रेरिता एव ब्रह्मविष्णुमहेश्वराः ॥ ६४ ॥

सृष्टिस्थित्यन्तकर्माणि सदा कुर्वन्ति सत्तम! ।
तथापि रुद्रः संहारप्रधानः सकलस्य तु ॥ ६५ ॥

प्रधानः पालने विष्णुः सृष्टौ साक्षात् पितामहः ।

63a) M1. — Om. नैव
63b) T1. — Om नापि for नैव
63) D4,G4,T2 — Om.
64a) G,G1 — ०द for ०दम्
64b) D3,G3. — ०यभू for ०तन्त्रः ;
M1. — Om स्वतन्त्र
64) D4,T2 — Om
65a) D,D3,D4,D5,D6,G3,G4, G6,G7,M,M1,M2,T1. — ०र्या० for ०र्मा०
65b) D3,D4,G3,G4. — ०र्वै for ०दा
65c) D4 — यथैव for तथापि ;
D3,G3 — ०थैव for ०थापि
D5,D6,G6 — ०रः
M,M1,M2,T1. — ०रे } for ०र०
G4. — Om. द्रः सहा
65d) M. — प्रधानम्
T1. — स्वतन्त्र } for प्रधान ;
M1. — Om तु
65) T2. — Om.
66a) D5,M — ०नम् for ०नः
D. — ०लको
M,M1. — ०ल्यते } for ०लने
66b) D. — ०ष्ठी for ०ष्टौ

त्रिमूर्तीनां तु सर्गस्यानन्तरं परमः शिवः ॥ ६६ ॥
शब्दादीनां तु भूतानामुत्पत्तिं कुरुते स्वयम् ।
सूक्ष्माकारान्मुने! शब्दाद्वायुः स्पर्शात्मकस्ततः ॥ ६७ ॥
रूपरूपो महानग्निर्जायते क्रमशो मुने! ।
आपस्तादृग्विधादग्नेरद्भ्यो गन्धवती क्षमा ॥ ६८ ॥
शब्दादिविषयेष्वेव जायन्ते पञ्चदेवताः ।

66c) D6. ०र्तानाम् for ०र्तीनाम्
D6. सज्ञ०
G5,M. सर्व० } for सर्ग०
G6. स्वर्ग०
66d) G4,T1. ०नन्तर } for नन्तरम् ;
M,M1 नान्तरम्
D6. ०मम् for ०मः
G6. Om रमः शिवः
66) T2. Om.
67a) T1. च for तु
67b) G,G7. ०त्तिः for ०त्तिम्
67c) D,D1,D2. ०रां for ०रात् ; G7 ०नें for ०ने!
D,D1,D2. ०ब्दो for ०ब्दात्
67d) D. हार्य for वायु. , शब्दा० for स्पर्शा० ,
and स्मृत for तत
G,G1,G3,G6,G7,M,M1,M2 ०युस्प० for ०यु स्प ,
G4. Om स्पर्शात्मक
67) T2. Om
68a) G3 तथा० for रूप०
68c) T1. अत० for आप० ; D5 ०ग्दया० for ०ग्विधा०
68d) D,D5,D6,G,G1,G2,G5,G6,G7,M1,M2,T,T1 ०न्धाभिधा } for ०न्धवती
D,D2,M ०न्धात्मिका
G ०म for ०मा
68) T2. Om
69a) D1,D2,D3,D4,D5,D6, G,G1,G2,G3,G4,G5,G6, G7,M,M1,M2,T,T1 } ०ष्वेव भूतेषु for ०विषयेष्वे०

सर्वज्ञस्यैव शब्देंऽशः स्पर्शे च क्षितिरुद्भभौ ॥ ६९ ॥
रूपे रुद्रस्य विष्णोश्च रसे गन्धे प्रजापतेः ।
तत्तदंशाः क्रमेणैव मुने! भूतसमुद्भवाः ॥ ७० ॥
सदाशिवेश्वरौ रुद्रस्तथा नारायणो विधिः ।
इति नाम्ना प्रतीर्त्यन्ते तेषु रुद्रः शिवाज्ञया ॥ ७१ ॥

69c) M. ०श्वै० } for ०स्यै०
T. ०स्त्वे०
D. ०ब्दोंऽशा
G,G1,G2. ०ब्दोऽशः
D3,D4,G3,G4. ०ब्देच } for ०ब्देऽशः
G5,T. ०ब्दाशः
M. ०ब्देशः
G6,G7. ०ब्देतु
T1. ०सर्वज्ञः for शब्देऽशः
69d) D. चक्षुतु
D2,D3,D5,D6,G,G1,G2,G4, G5,G6,G7,M,M1,M2,T,T1. चेक्षितु० } for ०च क्षिति०
D1. चैक्षितु०
D4. चीक्षितु०
D5. ०मुद्भभौ
G7. ०ना बभौ } for ०रुद्भभौ
D1. ०रुद्भवः
69) T2. Om.
70b) D,G7,M,M1 ०ते } ०तेः , G4. Om रसे ग
G3 ०तिः
70) T2. Om.
71a) M,M2. तथा for सदा
T1. तथा } ०श्वरौ
D,D3,D4,G4,G7,M1. ०श्वरो
71c) M,M2 नामानि for नाम्ना प्र० ;
D3. ०र्त्येते for ०र्त्यन्ते
71d) D2. Om ते ; M1. Om. शिवाज्ञया
71) T2. Om.

पुरस्तादण्डसर्गस्य ससर्जापो द्विधा पुनः ।
अपामेकांशके विद्वन्! स्वकं वीर्यमवासृजत् ॥ ७२ ॥

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिन् जज्ञे स्वयं विष्णुर्ब्रह्मांशेन समन्वितः ॥ ७३ ॥

आपो नारा इति प्रोक्ताः सूक्ष्मास्ता मुनिसत्तम! ।
शिवस्य नरसंज्ञस्य यतः कार्याणि तास्ततः ॥ ७४ ॥

ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।
सोऽयं नारायणः श्रीमान् स्वप्रधानस्वरूपतः ॥ ७५ ॥

72a) D5. पुरस्तौ सङ्ग्ड० / पुनस्तदण्ड० } for पुरस्तादण्ड० ; M1. Om. पुर
G7.
M. ०सज्ञ० for ०सर्ग०
72b) D4. ससर्ज द्विविधा for ससर्जापो द्विधा
72c) D. ०शको रुद्रः for ०शके विद्वन्!
D6,G6,G7. विद्वान् / तद्वत् } for विद्वन्! ; G4. Om. के विद्वन्
M.
72d) D. आसु / स्वयम् } for स्वकम्
G6,M.
D3,D6,G3,M. ०मपा० } for ०मवा०
D1,D2,G,G1,G2,G4,G5,G6,G7,T,T1. ०मुपा०
D5. ०मवस्रजत् for मवासृजत्
72) T2. Om.
73c) D5. ०स्मात् for ०स्मिन् , D4. अण्डे for जज्ञे
M1 Om. स्वय विष्णु
73) T2. Om.
74a) G7. ०र for ०रा , G6 ०क्तम् for ०क्ता
74b) D. ०क्ष्माशा for ०क्ष्मास्ता
74c) D. नार० / नन्त० } for ०नर , T1. ०रूप० for ०सज्ञ०
D1
74d) M. त० for य०
74) T2. Om.
75a) D. प्रोक्तम् for पूर्वम् ; M. Om. न पू
75d) D3,D4. ०नः for ०न०
75) T2. Om.

जनार्दनः सुखी विष्णुर्विष्वक्सेन इतीरितः ।
अंशोपाधिवशेनैव ब्रह्मेति परिकीर्तितः ॥ ७६ ॥

अपामन्तरवस्थानान्नारायण इतीरितः ।
जातवेदाः समाख्यातो रुद्रवीर्यात्मनैव तु ॥ ७७ ॥

सर्वकारणविश्वात्मेत्युच्यते सूक्ष्मदर्शिभिः ।
रुद्रस्य वीर्यजो विष्णुर्योऽयं नारायणाभिधः ॥ ७८ ॥

सोऽयं साम्बं महादेवं ध्यात्वा चन्द्रार्धशेखरम् ।
द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् ॥ ७९ ॥

76a)	D1.	तं० for ज०
76b)	M,M2	०ति स्मृ० for ०तीरि०
76c)	M,M1,M2,T1.	०ण्डो० for ०शो० ; M1. Om वशे
76)	T2	Om.
77a)	G6.	Om अपा ;
	G4.	Om स्वस्थाना
77b)	M.	०ति स्मृ० for ०तीरि०
77c)	M,M1,T1.	ज्या० for जा०
	D,D4,D5,D6,G2,G5,G6,G7,M2.	०दसमाख्यस्य } for ०दाः समाख्यातो
	D3,G3,G4	०दसमाख्यस्तु } for ०दाः समाख्यातो
	G,G1,T	समाख्यात } for ०दाः समाख्यातो
	M,M1,T1	०दसमाख्य॰ स्यात् } for ०दाः समाख्यातो
77)	T2	Om.
78a)	M,M1,M2	०र्वाकारेण for ०र्वकारण०
78c)	G6.	Om. रुद्रस्य
78d)	D1	०गम् for ०ऽयम् ; D6. ०णो० for ०णा०
	D3,D4,G3	०ह्वय॰ for ०भिधः ;
	G6.	०र्विष्वक्सेन इतीरित॰। सोऽय नारायणोऽभिधा } for योऽय नारायणाभिध॰
78)	T2.	Om.
79d)	G6.	Om मर्धेनपु
79cd)	D1.	०हाधर्मे for ०हमर्धे ;
	D1,D3.	०वे० for ०व०
79)	T2.	Om.

अर्धेन नारी तस्यां तु विराजमसृजत् परम् ।
पुनः सर्वेन्द्रियाणां च प्राणानां च समष्टयः ॥ ८० ॥
जायन्ते पञ्चभूतेषु सूक्ष्मेषु मुनिसत्तम! ।
सर्वासां च समष्टीनां नियन्त्र्यो देवताः पुनः ॥ ८१ ॥
विजायन्ते महाभूतसृष्टिः पश्चात् प्रवर्तते ।
भूतानां चाभिमानिन्यो जायन्ते देवताः पुनः ॥ ८२ ॥
ब्रह्माण्डं स्थूलभूतेभ्यो विजायेत यथापुरम् ।
हिरण्यगर्भो भगवान् ब्रह्मणोऽशस्तपोधन! ॥ ८३ ॥

80b) D,D3,D6,G,G1,G2,T. पुरम् } for परम्
G3,M,M2. पुरः } for परम्
D5,G5. पुरा } for परम्
T1. प्रभुः } for परम्

80c) M,M1,M2. ०रः० for ०नः० ; M. तु for च

80d) D4. ०णि० for ०णा० ; D5. प्रमाणानाम् for प्राणानां च
T,T1. ०न्च० for ०ष्टा०

80) T2. Om.

81a) T1. सर्व० for पञ्च०

81c) G4. Om. सा च

81d) D5. ०र्यत्यो for ०यन्त्र्यो

81) T2. Om.

82a) D. ०ताम् for ०त० ; M1. Om. भूत

82b) D. ०ष्टीम् for ०ष्टिः ;
G5 सर्वा for पश्चात् ; M1. Om पश्चात्

82c) D1. ना० for चा० ;
D. ०भ्यो for ०न्यो ; G6. Om भिमा

82) T2. Om.

83a) G5,M,T1. ०ण्ड० for ०ण्डम् ; D. देहे for भूते

83b) M1. ०यन्ते for ०येत ; G3,G4. तथापुरा for यथापुरम्
D,D1,D2,D3,D4,D5,D6,G,G1, G2,G5,G6,M,M1,M2,T,T1. ०रा for ०रम्

83d) D1,D3,G3,G4,M,M1,M2,T1. ०न } for ०न!
D. ०नाः } for ०न!

83cd) M1. Om. गर्भो भगवान् ब्रह्मणो

83) T2. Om.

ब्रह्माण्डं प्राविशत् स्वेन निर्मितं बहुरूपतः ।
सोऽयमण्डप्रधानेन वपुषा केवलेन तु ॥ ८४ ॥
सम्राट् चोभयरूपेण तैरेवाण्डं विवर्धते ।
अण्डावच्छिन्नभूतेभ्यो मुने! लोकाश्चतुर्दश ॥ ८५ ॥
कर्मणां फलभोगार्थं विजायन्ते शिवाज्ञया ।
तेषु लोकेषु भूलोकः पृथिव्यामेव जायते ॥ ८६ ॥
महातलाद्याः सप्तैव पातालाश्च समुद्गताः ।
महातलं हेमतलं सर्ववर्णोपशोभितम् ॥ ८७ ॥
प्रासादैर्विविधैः शुद्धैर्देवतायतनैर्युतम् ।

84a) D5. ०णम् for ०ण्डम्
84c) D1., G4. ०ण्डम्, ०न्य० } for ०ण्ड० ; D5. ०दा० for ०धा०
84) T2. Om.
85a) D. सम्राड्यो for सम्राट् चो
D3,D4,G3,G4. स्वराट्स्व० for चोभयः ; M1. Om चोभयरू
85b) M. ०निर्ममे for ०वर्धते
85) T2. Om.
86a) G6. Om. फल
86c) M1. Om. तेषु ; D3,D4. ०र्लो० for ०लो०
86) T2. Om.
87a) M,M1,M2,T1. ०दयः सप्त for ०द्याः सप्तैव ; D6. सेमेव for सप्तैव
87b) D ०लाद्या
D6. ०लश्च
G3,G4 ०लाच्च } for ०लाश्च
87c) M., D6. ०मयम्, ०तल० } for तलम् the second.
87d) T1. ०रत्नो० for ०वर्णो०
87) T2. Om.
88a) G3. बहुभिः for विविधैः
D., T1. गन्धैः, शुभ्रैः } for शुद्धैः
88b) T1. शुभम् for युतम्

शैलं रसातलं विप्र! शार्करं हि तलातलम् ॥ ८८ ॥
पीतं सुतलमित्युक्तमतलं विद्रुमप्रभम् ।
सितं हि वितलं प्रोक्तं पातालं च सितेतरत् ॥ ८९ ॥
तेषामधस्तान्नरका रौरवाद्याः प्रकीर्तिताः ।
पापिनस्तेषु पच्यन्ते न ते वर्णयितुं क्षमाः ॥ ९० ॥

88c) D,D3,D6,G,G3,G7,T. ०प्राः for ०प्र !

88d) D,D5. शाङ्क० } for शार्क० ; D. रसा० for तला०
G3,G4. साग० }

88) T2. Om.

89a) D,D1,D2,D5,D6,G,G1,G2, G5,G6,G7,M,M1,M2,T,T1. } ०क्तम् for ०क्त०

89b) D1,D2.D5,D6,G,G1,G2, G6,M,M1,M2,T,T1. } नि०
D. वि० } for ०म० the first. ; G4. ०तु for ०त०
G6. सि० }
G7. नितला for ०मतलम्, and ०भा for ०भम्
M1. Om. वि

89c) M, च for हि
D,D1, नि } for वि ;
M, सि }
D5. ०म० for ०त० ; G4. Om. प्रोक्तम्

89d) D,D2,D5,D6,G,G1,G2,G5, G6,G7,M,M1,M2,T1,T1. } तल चैव } for पाताल च
D1. तले चैव }
D,D1,D2,D3,D4,D6,G,G1, G2,G3,G4,G5,G6,G7,M,T. } सितेतरम् } for सितेतरत्
D5. वितेतनम् }

89) T2. Om.

90b) D,D1,D2,D6,G1,G2,G5,G6,G7,T. न मया परि०
G4. मयाद्य परि०
D5,M,M1,M2,T1 मायाद्याः परि० } for रौरवाद्या. प्र०
G. न मायापरि०

90d) M. क्रू० for क्ष०

90) T2. Om.

पातालानामधस्त्वास्ते शेषाख्या वैष्णवी तनुः ।
तदाधारमिदं सर्वं सा तु कालाग्निमाश्रिता ॥ ९१ ॥
भुवर्लो(वोलो?)को जले जातः स्वर्लोको जातवेदसि ।
महर्लोका(होलोका?)दयो जातास्त्रयो वायौ महामुने! ॥ ९२ ॥
सत्यलोकस्तथाकाशे मुने! जातः सुशोभनः ।
सप्तद्वीपा महाभूमिः सर्वेषामिष्टसाधिका ॥ ९३ ॥

91a) D. ०लो नाम य० for ०लानामध०
G7. ०स्तात्ते
D3,D4,G4. ०स्तात्तु
D6. ०स्तान्ते } for ०स्त्वास्ते
M,M1,M2,T1. ०श्वास्ते
D5,G6. ०स्तास्ते
91b) G5. ०नूः for ०नुः
91c) G. ०मम् for ०दम्
91d) G4. Om. सा तु काला
G6. कामा०
M2. सकला० } for काला०
91) T2. Om.
92a) D. ०नोलोकः for ०ले जातः ;
M1. Om. लोको
92b) D6. ०से for ०सि
92c) D6. ०धोस्तूयो for ०यो जाता०
92d) D6. वाधौ for स्त्रयो and om. वायौ महामुने
G6 ०यौ पा० for ०यो वा०
92) T2. Om.
93b) M1 Om. सुशोभनः
93c) G3. ०प० for ०पा ;
D5. ०मी for ०मिः
93d) G3. ०धकः for ०धिका
93cd) G4. Om. ०सद्वीपा महाभूमिः स
93) T2. Om.

जम्बूद्वीपो मुने! पूर्वं प्लक्षद्वीपस्ततः परम् ।
तत्परं शाल्मलद्वीपः कुशद्वीपस्ततः परम् ॥ ९४ ॥
क्रौञ्चद्वीपस्ततः प्रोक्तः शाकद्वीपस्ततः परम् ।
पुनश्च पुष्करद्वीपो जम्बूद्वीपे श्रुतिस्मृती ॥ ९५ ॥
तत्र धर्मस्य सर्वस्वमधर्मोऽप्यत्र तिष्ठति ।
द्वीपानावृत्य तिष्ठन्ति सागराः सप्त सत्तम! ॥ ९६ ॥

94b) D1,D2. ◦था for ◦तः
94c) D5,D6,T1. ◦र for ◦रम्
G3. तत परम् } for तत्परम्
M1. तथा }
D,D3,G4,G5. ◦लि◦ } for ◦ल
D1,D2,D5,D6,G1,G2,G6,G7,T1. ◦ली◦ }
94d) T1. ◦रः for ◦रम् ; M1. Om. तः परम्
94cd) D4. 'शाल्मलि' 'कुश' 'क्रौञ्च' 'शाक' 'पुष्कर' तत्र जम्बू for तत्पर शाल्मलद्वीपः कुशद्वीपस्तत. परम्
M,M2. Om.
94) T2. Om.
95a) D4. ◦द्वीपे श्रुतिस्मृती। for ◦द्वीपस्ततः प्रोक्त·
95b) D4. Om.
95ab) M,M2. Om.
95c) D3,G3. तथैव for पुनश्च ;
G1. ◦रम् for ◦र
D5,D6,G,G1,G2,G5,G6, G7,M,M1,M2,T. } ◦पम् for ◦पो
95d) D,D1,D2,D3,D6,G,G1, G2,G5,G6,G7,T,T1. } ◦तिः for ◦ती ; G4. Om.
95cd) D4. Om
95) T2. Om.
96b) G6. Om मधर्मोऽप्य , M1. Om. त्र ति
M. त्यत्र
T1. ◦ऽन्यत्र } for ◦ऽप्यत्र
D5. ◦ऽप्यवि◦ }
96c) D,D4. ◦न्त for ◦न्ति
96) T2. Om

द्वीपाद्द्वीपो महानुक्तः सागरादपि सागरः ।
क्षारोदेक्षुरसोदश्च सुरोदश्च घृतोदकः ॥ ९७ ॥
दध्युदः क्षीरसलिलः स्वादूदश्चेति सागराः ।
पञ्चाशत्कोटिविस्तीर्णा ससमुद्रा धरा स्मृता ॥ ९८ ॥
जम्बूद्वीपः समस्तानां द्वीपानां मध्यमे स्थितः ।
तस्य मध्ये महामेरुर्विश्रुतः कनकप्रभः ॥ ९९ ॥
चतुरशीतिसाहस्रयोजनस्तस्य चोच्छ्रयः ।

97b) M1. ०रगः for ०गरः

97d) D5. ०क० for ०श्च ; G5,M1. Om. सु

97cd) G6. Om. दश्च सु

97) T2 Om

98a) D,D3. दधिक्षीरोदसलिल· } for दध्युदः क्षीरसलिलः
D1,D2,D4,D6,G,G3,G4, G7,M,M1,M2,T,T1 } दध्युदक्षीरसलिल·
G6 दध्युदक्षीरसलिलम्

98b) D5. स्वाद्रूद० } for स्वादूद०
D6 स्वाहद० }

D4. ०दः सप्त० } for ०दश्चेति
T1. ०दाश्चेति }

M2. ०र. for ०राः ;

G4. Om. ददुश्चेति सा

98d) M2. ०द्र० for ०द्रा

98) T2 Om.

99b) G6 Om. द्वीपना and मे , ०ध्ये for ०ध्य०

99d) G,G1,G2,G4. मिश्रित } for विश्रुतः
M2 विश्रिति

99) T2 Om. , D4. Reads in prose order in place of verses No. 99-120. See under the footnotes to verse No. 120

100a) D,D1,D2,D3,D5,D6,G,G1,G2, G3,G4,G5,G6,G7,M,M2,T,T1. } ०रा० for ०र० ;

D. ०स्रो } for ०स्र०
D6,G,G1,G2,G5,G6,G7,T1. ०स्रम् }

100b) T1. ०नै० for ०न०

प्रविष्टः षोडशाधस्ताद् द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ १०० ॥
मूले षोडशसाहस्रो विस्तारस्तस्य सर्वतः ।
भूपद्मस्यास्य शैलोऽसौ कर्णिकात्वेन संस्थितः ॥ १०१ ॥
हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे ।
नीलः श्वेतश्च शृङ्गी तदुत्तरे वर्षपर्वताः ॥ १०२ ॥
तिष्ठन्ति परितश्चान्ये पर्वता मन्दरादयः ।
भवेयुर्बहुधा वर्षैर्द्वीपानि बहुभिर्बुध! ॥ १०३ ॥

100c) G4. Om.
100d) G6. Om. द्वात्रिंशन्मूर्ध्नि : M1. ०र्धनि for ०र्ध्नि
D6,M2. ०स्मृ० for स्तृ०
100cd) T1. Om
100) D4,T2. Om.
101b) G4. ०स्य तु for ०स्तस्य , G3 प० for म०
101ab) T1,G7. Om.
101c) M,M1 भुवन० } for भूपद्म० ; T1. कैलासो for शैलोऽसौ
G3 भूपात्म० }
101d) M कनकाचलसन्निभ for कर्णिकात्वेन संस्थित
T1 ०काग० for ०त्वेन ; M1. Om
101) D,D1,D2,D4,D6,G,G1,G2,G5,G6,T2. Om.
102b) D2. निषद० }
G1,G7. निषेध० } for निषध०
G4. विषय० }
102d) M वर्ह० } for वर्ष०
D6. वृष० }
102cd) D,D1,D2,D6.G,G1,G2,G5, G6,G7,M,M1,M2,T,T1. } च उ० } for तदु० , G4. Om शृङ्गी तदु
D5. ०ष्वरु० }
102) D4,T2. Om
103a) D,D5,G2,G5. ०र्वता० for ०रित०
103b) D. ०रितो for ०र्वता
103ab) M1. Om. तश्चान्ये पर्वता मन्दरादय
103c) D,D1,D2,D3,D5,D6,G,G1,G2, G3.G4,G5,G6,G7,M,M1,M2,T. } द्वीपे for वर्षै ; G5 बहु. .पे for बहुधा वर्षे
103d) D1,D2. वर्षाणि for द्वीपानि : D,G,G2,G3G4 ०धा for ०प!
103) D4,T2. Om

पुष्करे तु महापीतं[१] धातकी [२]षण्डसंयुतम् ।
शाकद्वीपसमाख्ये तु वर्षं जलद[३]संज्ञितम् ॥ १०४ ॥
कौमारं[४] सुकुमारं[५] च मणिपं[६] कुसुमो ७ त्तरम् ।

104a) D3,G4. च / ०पु } for तु
G7.
D. द्वीपे
D1. ०पीतः
G6. ०वीतम् } for ०पीतम्
M. ०सीतम्
104b) D. केतकीखण्डमण्डिते for धातकीषण्डसयुतम्
M. ०म० for ०त०
D1,D2,T1. ०ज्ञि० } for ०यु०
M,M1,M2. ०हि
104c) D1. ०पं for ०प०
104d) D,G3. ०र्षो } for ०र्षम्
D3,D5,D6,G,G1,G2,G4, G5,G6,G7,M,M2,T ०र्षं
D,D3,D5,D6,G,G1,G2, G3,G4,G5,G6,G7,T. ०युतः
D1,D2. ०निभम् } for ०ज्ञितम् ; M1. Om तु वर्षम्
M,M1,M2. ०हितम्
104) D4,T2. Om.
105a) G2,G5. कु० for कौ
D. ०मारः सुकुमारश्च for ०मार सुकुमार च
G4. Om. सुकुमा
105b) D1. मणिकम् } for मणिपम्
D3,G3. वर्षपम्
G2 कुनुमो० } for कुसुमो०
G5. कानुमो०
D1. ०रोधरम् } for मोत्तरम्
D2,G,G1,T,T1. ०रोत्तरम्
D. मणिपङ्कसुरोत्तमम् for मणिप कुसुमोत्तरम्
G6. Om. प कुसुमो

मोदकाख्यं[८] मुने! वर्षं महानृत[९]समाह्वयम् ॥ १०५ ॥
क्रौञ्चद्वीपे तु कुशलं[१०] मुने! वर्षं मनोरथम्[११] ।
उष्णं[१२] प्रवर[१३]संज्ञं च मुनिवर्ष[१४]समाह्वयम् ॥ १०६ ॥
अन्धकार[१५]समाख्यं च तथा दुन्दुभि[१६]संज्ञितम् ।
कुशद्वीपे तु योगीन्द्र! वर्षमुद्भिद[१७]संज्ञितम् ॥ १०७ ॥

105c) D3. ०र्व० for व०

105d) D5. अनाहृत
G5. महामृत
M,M1,M2. महानुत
T. महान्कृत०
} for महानृत०
T1. महात्रसतमा for महानृतसमा

105) D4,T2 Om.

106a) M1. Om. शलम्

106b) D1,D2,G,G1,G2. ०र्ष० for ०र्षम्
D6,G6 ०र्षमनोस्यम् for मनोरथम् ;
G7 ०मम् for ०थम्

106d) D. ०ने वर्षम् for ०निवर्ष०
G5. Om. ०मुनि ; G7. Om. यम्

106) D4,M,T2. Om.

107a) D. अश०
D1,D2,D5,G,G1,G2,G5, G7,M,M1,M2,T,T1. अस
} for अन्ध० ; G6. Om. अन्धकार
D. ०ह्वम् for ०ख्यम्

107b) D. ०ज्ञकम् for ०ज्ञितम् ; G4. Om

107c) G4. Om. कुशद्वीपे तु
M. ०पेन्द्र० for ०पे तु and Om. योगीन्द्र
D1,M1. ०गे० for ०गी०

107d) D1 ०मुद्रिर०
M1. ०मुत्थित०
M2. ०मुद्गीत०
T1. ०मुद्भेद०
T2. ०मद्भुत०
} for ०मुद्भिद०

107) D4. Om.

वेणु[१८] वर्षं तथा विद्धन्! वर्षं स्वैरक[१९]संज्ञितम् ।
लम्बकं[२०] धृति[२१]संज्ञं च मुने! वर्षं प्रभाकरम्[२२] ॥ १०८ ॥
कपिलं[२३] शाल्मलद्वीपे श्वेतवर्ष[२४]समाह्वयम् ।
हरितालं[२५] मुने! वर्षं वर्षं जीमूत[२६]संज्ञितम् ॥ १०९ ॥
हरितं[२७] वैद्युतं[२८] वर्षं मानसं[२९] सुप्रभा[३०]भिधम् ।

108a) D. ०ण० for ०णु
108b) G1. स्वैरीक०
D1,D2,G,G2,G4,G5,G6,G7,T,T2. स्वैरिक०
G3. सैरक०
M,M1,M2. स्वैरत०
T1. स्वैरित०
} for स्वैरक० ; D. ०ज्ञकम् for ०ज्ञितम्
108c) M1 ०म्बतम्
T1. ०म्बनम्
} for ०म्बकम्
D. स्मृति०
D1. धृत०
} for धृति०
108d) M1. Om. क
108) D4. Om.
109a) D,D3. का० for क०
D6,G,G1,G4,M1. शल्मली०
G5. शल्मलि०
D,D1,D2,D3,D4,D5,T1,T2. शाल्मली०
G3,G6,G7,T. शाल्मलि०
} for शाल्मल०
109c) D3,G3,G4 ०रिताख्यम्
G1. ०रितालम्
M1 ०रितालाख्यम्
T1 ०रितास्यम्
} for ०रितालम् ; D. तथा for मुने !
T2. Om. ; G4. Om. वर्षम्
109d) D ०ज्ञकम् for ०ज्ञितम् ; G4. Om. वर्ष जीमूत
M2. ०र्ष० for ०र्षम्
109) D4. Om.
110a) G4. हरीत०
T1. प्रेरितम्०
} for ०हरितम् ; M1. Om. व ; D5. Om.

प्लक्षद्वीपे मुनिश्रेष्ठ! वर्षं शान्त[३१]भयाह्वयम् ॥ ११० ॥

गिरि[३२]शाख्यं तथा वर्षं वर्षं विद्युत्सुखो[३३] दयम् ।

आनन्दाख्यं[३४]शिवाख्यं[३५] च क्षेमकाख्यं[३६] द्रुमाह्वयम् ३७ ॥ १११॥

110b) D,D3. ०भावितम्
D1,D2,G,G1,G2,G5,T. ०साधिकम्
D5. ०भादिकम्
D6,G3,G4,G6 ०भाधिकम्
T महान् कृत०
} for ०भाभिधम् ; M1 Om. मा

110d) G. सुविश्रान्तसमा०
G1 सवर्षशाश्रान्ता०
D6,G6,T1 वर्षशाश्रान्तभा०
} for वर्षशान्तभया०

D1,D2. शान्तश्रान्त० for वर्षशान्त०

G2. शाश्रान्तना०
G5. शाश्रान्तभा०
G7. श्रान्तान्तभा०
T1. शाम्बभया०
D. शालान्तका०
} for शान्तभया०

110) D4. Om.

111a) D3,G3,G4,M,M1,M2,T1,T2. शिशिरा०
D,G5. गिरीशा०
} for गिरिशा०

D6. गिरिख्या for गिरिशाख्यम्

111b) D5,G6. Om. वर्षम् ;

D,G3,G4,M1. ०द्वन्
M2. ०द्वत्
} for ०द्युत् ; D. ०खाह्व० for ०खोद०

111c) D1,D2,G,G1,T अनदा०
G6. आदन्दा०
} for आनन्दा ; M1 Om आनन्दा

G4. Om. वाख्य च ; T1. हेमकाख्यम् for शिवाख्य च

111d) D,M क्षेमकाख्य०
G2,G5. क्षेमाख्य च
} for क्षेमकाख्यम् .

T1. Om क्षेमकाख्यम्

G6. क्षेमकार्यन्द्रमा० for क्षेमकाख्य द्रुमा०

D5. समा० for द्रुमा०

111) D4. Om.

जम्बूद्वीपे मुनिश्रेष्ठ! वर्षं हिमवदा[३८]ह्वयम् ।
देवकूटाभिधं[३९] वर्षं निषधा[४०]ख्यमिलावृतम्[४१] ॥ ११२ ॥
नीलोत्पल[४२]समाख्यं च श्वेतवर्षं[४३] तथोत्तरम्[४४] ।
पूर्वसंज्ञं[४५] तथा वर्षं गन्धमादन[४६]संज्ञितम् ॥ ११३ ॥
षट्चत्वारिंशदेतानि वर्षाणि द्विजपुङ्गव! ।
वर्षेष्वेतेषु राजानः षट्चत्वारिंशदेव हि ॥ ११४ ॥
जम्बूद्वीपाधिपाः सर्वे राजानः सत्यवादिनः ।

112a) G4. Om. जम्बूद्वीपे मुनि
112b) T2. Om. वर्ष हि
G4 भीमसमा० } for हिमवदा०
T1. हेमसमा० } for हिमवदा०
D5. हिससमा० } for हिमवदा०
D3,G3,M,M1,M2,T2 ०समा० for ०वदा०
112c) T1. हेम० for देव० ; G. कण्टा० for ०कूटा०
112d) D1,D2,G,G1,G2,G4,G5,G7,T. ०षादा० } for ०षधा०
D6,T2. ०षदा० } for ०षधा०
T. ०मिवा० } for ०मिला०
G2. ०मिडा० } for ०मिला०
G. ०व्र० for ०वृ० ; M1. Om. षधाख्यमिला
112) D4. Om.
113b) D5. ०र्णम् } for ०र्षम्
T1 ०च्च } for ०र्षम्
113d) M. ०का } for ०तम्
M1. ०कम् } for ०तम्
113) D4. Om
114b) D. ०वाः for ०व ! , G4. Om. जपुगव
M1. Om. णि द्विजपु
114c) G4 Om. वर्षेष्वेतेषु
114) D4. Om.
115a) T2. ०पेश्वराः for ०पाधिपाः ; G3. Om. धिपा
115b) G7. Om. त्यवादिनः

वेदोदितसमाचारनिरता विश्वरक्षकाः ॥ ११५ ॥
अत्युग्रा दुर्विनीतानां निर्घृणाश्च विशेषतः ।
प्रशान्ताश्च विनीतानां सघृणाश्च विशेषतः ॥ ११६ ॥
दयायज्ञपराः शुद्धा देवतानां च पोषकाः ।
ब्राह्मणानां विशेषेण विदुषां च विशेषतः ॥ ११७ ॥
स्थापका वेदमार्गस्य विशेषेण सदा मुदा ।

115c) T2. देवो॰ for वेदो॰ ;
G1. ॰क्तसमया॰ for ॰दितसमा॰
M. ॰रे for ॰र॰ ; M1. Om. रता वि
115) D4. Om.
116a) G6. Om. अत्युग्रा
116b) D. ॰घृ for ॰र्घृ॰
G3. निगुणास्तु } for निर्घृणाश्च
G4,T2. निर्गुणेषु }
116c) D. ॰सन्ना॰ for ॰शान्ता॰ ;
G4 विन... for विनीतानाम्
116d) D5,G3,M,M1,M2,T1,T2. महाबलपराक्रमा॰ ॥ } for सघृणाश्च विशेषत॰ ॥
G4. ..... क्रमाः ॥ }
G6. स॰ for स॰
116) D4. Om.
117a) M,M1,M2,T1. दान॰ } for दया॰ ; D5. ॰ध॰ for ॰प॰
G4,T2. वेद॰ }
D3. ॰द्धो for ॰द्धा
117b) M1. देवता } for पोषकाः
T1. पूजकाः }
117ab) D,D1,D2,D6,T Om.
117c) D ॰नीतानाम् for ॰शेषेण
117d) D. रक्षका लिङ्गपूजकाः ॥ } for विदुषा च विशेषत॰ ॥
D1,D2,D6,T. शिवलिङ्गार्चने रता॰ ॥ }
D5. तु for च
117) D4,G,G1,G2,G5,G6,G7. Om.
118b) M,M2. विशेषत.। for सदा मुदा।
118ab) G,G1,G2,G5,G6,G7. Om.

शिवभक्ता विशेषेण शिवलिङ्गार्चने रताः ॥ ११८ ॥
त्रिपुण्ड्रावलिभिर्दीप्ताः सितभस्मावगुण्ठिताः ।
जम्बूद्वीपमिदं तेषां चरितेन विशेषतः ॥ ११९ ॥
पुण्यभूमिरिति ख्यातं प्राप्यं पुण्यवतां नृणाम् ।
महापापवतां नृणामप्राप्यमतिशोभनम् ॥ १२० ॥

118c) G,G2,G5,G6,G7. ब्राह्मणानाम् } for शिवभक्ता ; G4. ०क्त्या for ०क्ता
G1. ब्राह्मणादिनाम् }
118d) T1 विदुषा च विशेषत· ॥ for शिवलिङ्गार्चने रताः ॥
G4 Om. लिङ्गार्चने रता· ; G6. Om. गार्चने रताः
118cd) M,M2. Om.
118) D,D1,D2,D4,D6,T,T2. Om.
119a) G6. Om. त्रिपुण्ड्रा
119b) D,D3,D5,D6,G,G1,G2,G3, G4,G5,G6,G7,M1,T,T1,T2. } ०कु० for ०गु०
119d) G7 Om. न वि
119) D4,M,M1. Om.
120a) D ०मीरिति ख्याता for ०मिरिति ख्यातम्
M1 Om. ति ख्या , M2. ०ता for ०तम्
120b) D. ०ग्या } for ग्यम् ; G,G2. ०ता for ०ताम्
D6. ०ग्य }
120c) D5,G ०ता for ०ताम् ; D,G नृ० for नृ०
120d) D6,G7. ०मिति for ०मति ; G4 Om. भनम्
120) D4. Om.

D4 Reads in prose order in place of verses No 99-120 as follows -

40b)	G2,G5.	वेद० for भेदे० ; G7. ०द० for ०दे०
	G.	०ल लभेत। for ०लम्भनात्।
	D5.	भेदानामनुलम्भनात्। } for भेदेनानुपलम्भनात्।
	M1.	भेदानानुपलम्भ - । }
	M.	मत यस्यापि वादिन । }
40c)	M1.	Om. ज्ञानात्म
40d)	G7	०यम् for ०तम् ; D. ०स्तु for ०पि
	G3.	०स्य वि० for ०स्यापि ; M1 Om. पि
40cd)	M.	Om.
40)	T2.	Om.
41b)	D4.	Om ज्ञानात्
41c)	M1.	Om. पलापे तु ,
	M.	०प्यलाभे for ०पलापे
	T1.	न for तु
41d)	M.	बहुषु for बहिष्ट्व
	G,G1.	०ष्ट्वा } for ष्ट्व
	G3,G4.	०ष्ट० }
	M1.	Om. बहिष्ट्वि ;
	M.	०नात्॥ for ०नम्॥
41)	T2.	Om.

प्रसज्यते प्रतीतस्य बाधे ज्ञानस्य तत्समम् ।
अर्थज्ञानादिरूपेण शुद्धशून्यं न भाति च ॥ ४२ ॥
शून्यस्यास्फुरणं त्वेतैर्वादिभिर्हीष्यते स्वतः ।
परतोऽपि न शून्यस्य स्फुरणं बोधविष्यति ॥ ४३ ॥
तेषां नास्ति स्फुरद्रूपं खलु किञ्चिदपि द्विज! ।
अतो रूप्यं च तज्ज्ञानं विद्यते मुनिरूपणे ॥ ४४ ॥
शुक्तिकावर्तिचैतन्ये स्थिता माया जडात्मिका ।

42a)	G3.	०क० for ०त०
42b)	G3,M1.	बो for बा
	G3,T. T1.	०ध ०धात् } for ०धें ; G4. Om. ज्ञानस्य
42d)	D3,G3.	०द्धम् for ०द्ध० ; M1. Om. भाति च ॥
42)	T2.	Om.
43a)	D1,D2. G3.	०य ०स० } for ०स्या ; M1 Om. शून्यस्या
	D,D2,D3,D4,D5,D6,G,G1,G2, G3,G4,G5,G6,G7,M1,M2,T.	०णत्वम् for ०ण त्वें
	D1. T1.	०णत्वैतैः ०णत्वेन } for ०ण त्वेतैः
43b)	D. G4.	०र्हं० ०र्भा० } for ०हीं
43d)	D5,G5,G7 D1,D2. G4. G7.	वो भो तु } for बो ; G1. ०धयि० for ०भवि Om.
43)	T2.	Om.
44a)	M1.	Om. पम्
44b)	M1.	Om. ख ; G1. ०ति for ०पि and om. द्विज !
44c)	D6.	०पम् for ०प्यम् ;
	M	०स्य for च ; G4. Om. रूप्यम्
44d)	D5,T.	नु for सु०
44cd)	G1.	Om.
44)	T2.	Om.
45a)	G3,M,M2.	०वृत्ति० for ०वर्ति० ;
	D4,M.	०न्य० for ०न्ये
45b)	D6.	०याऽऽ० for ०या० ; D5. ०र्जसा for जडा
	M1.	Om. का ।

भास्वरत्वत्रिकोणत्वप्राणिकर्मादिहेतुभिः ॥ ४५ ॥
रूप्यवासनया चापि सम्यङ्नियमिता बुध! ।
कलधौतात्मना विद्वन्! सत्यवस्तु विवर्तते ॥ ४६ ॥
क्षुद्रमायाविलासस्तु व्यवहारे तु बाध्यते ।
जीवमायाविलासस्तु व्यवहारे न बाध्यते ॥ ४७ ॥
एतावतैव सम्यक्त्वभ्रान्तित्वप्रतिभा भवेत् ।

45c)	G3.	०स्क० for ०स्व० ; D6. Om. र
	G6.	Om. त्व the second.
45abc)	G1.	Om.
45d)	G6.	०ण० for ०णि० ;
	M	०णि for ०दि० ; G1. Om. प्राणिकर्मादि
45)	T2.	Om.
46a)	D5,M.	०बाध० for ०वास० ;
	D6,G2.	बा० for ०चा०
	G5.	बाचि for चापि
46b)	D.	०मतो for ०मिता
	D3,D4,G3.	०धैः। } for ०ध!
	D6.	०धा। }
46c)	D5.	का० for क० ;
	D1.	Om. ता ; D6. Om. वि
46d)	D5,G,G2,G7.	०त्यम् for ०त्य० , D3,G5,T,T1. ०त्तु for ०स्तु
	M1.	Om. सत्य ; G4. Om. सत्यवस्तु
46)	T2.	Om.
47b)	D,D1,D2,G,G1,G6,G7,T	०धु }
	D3,D4,G3,G4.	०पि } for तु , T1. वर्त० for वाय०
	G2,G5.	स }
47c)	T1.	स्थिर० for जीव०
47d)	D,D1,D3,G3.	०ण० for न ; M1. Om. ध्य
47cd)	G1,G2,G5.	Om.
47)	T2.	Om.
48a)	G.	०त्यत्व० } for ०म्यत्तत्व०
	T1	०त्यत्वम् }
48b)	T1.	०त्वम् for ०त्व०
	D4.	०वयेत्। } for भवेत्। ; D6. Om भ
	G3.	०सते। }
	T1.	०ति चेत्। }

शुक्तिकारजतं तस्मादस्ति भाति च सत्तम! ॥ ४८ ॥
वैलक्षण्यमतस्तुच्छाच्छुक्तिरूप्यस्य विद्यते ।
सद्विलक्षणता चास्ति बाधितत्वाद्विजोत्तम! ॥ ४९ ॥
अतो मायामयं साक्षाच्छुक्तिकारजतं बुध! ।
मायामयमिदं सर्वं दृश्यत्वाच्छुक्तिरूप्यवत् ॥ ५० ॥
अतः साक्षादशुद्धिस्तु मायाज्ञानेन चात्मनः ।
तन्निवृत्त्या विशुद्धिः स्यादात्मनः सर्वसाक्षिणः ॥ ५१ ॥
तन्निवृत्तिस्तु विज्ञानादेव वेदान्तवाक्यजात् ।
अतो वेदान्तविज्ञानं शुद्धिहेतुः सदात्मनः ॥ ५२ ॥

48c) G3. Om. का
48d) D5. ०तीव for ०ति च
48) T2. Om.
49a) M. Om. त ; ०स्तस्मा० for ०स्तुच्छा०
M1. Om. तस्तुच्छा ; G4. Om.
49b) D6. Om. च्छु , G4. Om. च्छुक्ति
D1,D2,G7. ०प्यतु } for ०प्यस्य
G,G1. ०प्यस्तु }
49c) G5. ०दादिलक्षणा for द्विलक्षणता ; T1. ना० for चा०
49) T2. Om.
50a) M1. Om. मय साक्षा
50b) D ०धैः । } for ०ध !
D1,D6 ०धः । }
50d) M1. Om. वत् ॥
50) T2. Om.
51a) D5. त० for अ , G4. Om.
51b) D4. ०मय स for ०ज्ञानेन , G4. Om. मायाज्ञानेन
G6. वा for चा ; M1. Om.
51c) M1. Om. तन्निवृत्त्या
G2. ०भि० } for वि०
G5. ०दि० }
51d) D,D1. ०चा० for ०दा०
51) T2. Om.
52d) G6. Om. शुद्धि० ; M1. Om. हेतुः स
52) T2. Om.

आत्मा शुद्धः सदा साक्षाद्ब्रह्मरूपतया बुध! ।
ब्रह्म शुद्धं सदा बुद्धं नित्यमुक्तं निरञ्जनम् ॥ ५३ ॥
ब्रह्मैवात्मा न तद्भिन्नं सुसूक्ष्मं परिपश्यताम् ।
भेदस्त्वौपाधिकस्तस्माज्जीवत्वं व्यावहारिकम् ॥ ५४ ॥
व्यवहारदशायां तु पुण्यपापावृतः पुमान् ।
विज्ञानश्रद्धया पापान्मुच्यते जीवसंज्ञितः ॥ ५५ ॥
सर्ववेदान्तवाक्यानां तात्पर्यस्य निरूपणात् ।
श्रवणात् सर्वपापेभ्यो मुच्यते जीवसंज्ञितः ॥ ५६ ॥
अतः किं बहुनोक्तेन ब्रह्मविद्या मुनीश्वर! ।
पापानामपि सर्वेषां शुद्धिहेतुर्महत्तरः ॥ ५७ ॥

53b) G4 मिथः। } for बुध!
G6,G7. पुनः। }
53c) D5 आत्म for ब्रह्म ,
D3. ०द्धतया for ०द्ध सदा
D4. त० for स , G4. Om ब्रह्म शुद्ध स
53) T2. Om.
54a) M1. Om. त्मा न ;
M2. तु भि० for तद्भि०
54b) D3,D4. ०द्द० for ०प०
54) T2. Om.
55a) D6. ०द्द० for ०प०
55b) G3,G4. ०पाप० for ०पापा० ; M1. Om. पापा
55c) G7. यद् ज्ञात्वा for विज्ञान० ; G3. ०नम् for ०न०
D5. साक्षा० for पापा० ; G4. Om. पापात्
55) T2. Om.
56c) M1. Om. श्रवणात् स
56) M,T2. Om.
57c) D3. पापि० for पापा ; D6. Om. ना
57d) M1. Om. शुद्धिहेतु ; G4. Om हेतु
D,D4,D5. ०रा ॥ } for र ॥
G3. ०रम् ॥ }
M1. ०त्पर॰ ॥ for ०त्तर॰ ॥
57) T2. Om.

॥ इति श्रीस्कान्दे पुराणे सौरसंहितायामष्टमोऽध्यायः ॥

Colophon :

M1,M2.	इति	for इति श्रीस्कान्दे पुराणे
D3,D4,D5,G2,G3,G7.	इति स्कान्दे	
G,G1,T.	इति श्रीस्कान्दे	
M.	इति स्कान्दे पुराणे	
D1.	इति श्रीस्कन्दे महापुराणे	
D2,D5.	इति श्रीस्कान्दे महापुराणे	
G6.	इति महापुराणे स्कान्दे	
D.	इत्यादिमहापुराणे स्कान्दे	
D6,G4.	इत्यादिमहापुराणे श्रीस्कान्दे	
D6.	सूर्य० **for** सौर०	
D.	०या ब्रह्मविद्यानिरूपण नामा०	for ०याम०
D1,D2.	०या महाप्रायश्चित्तवर्णन नामा०	
G,G1,G2,G5,T.	०या महाप्रायश्चित्त नामा०	
D6,G4,G6,G7.	०या पापप्रायश्चित्त नामा०	
D4.	०या सर्वप्रायश्चित्त ब्रह्मविद्यानिरूपण नामा०	
D5.	०या सप्त० **for** ०यामष्ट० ; **T2. Om.**	

॥ अथ नवमोऽध्यायः ॥

श्रीभगवानुवाच

अथ विज्ञानमाहात्म्यं प्रवक्ष्यामि समासतः ।
इतः पूर्वं मया नोक्तं कस्यचिच्च मुनीश्वर! ॥ १ ॥
विज्ञानं नाम वेदोत्थं न प्रमाणान्तरोद्भतम् ।
तत् पुनर्द्विविधं प्रोक्तं समासेन मनीषिभिः ॥ २ ॥
धर्मैकविषयं त्वेकं ब्रह्मैकविषयं परम् ।
धर्मैकविषयं ज्ञानं ब्रह्मैकविषयस्य तु ॥ ३ ॥

Before1a)	D4,G,G1,G2,T.	श्रीभगवान् - } for श्रीभगवानुवाच-
	M.	भगवान् -
	D5.	रविः -
	D1.	भानुरुवाच -
	D3,M1.	भगवानुवाच -
	T2.	Om. श्रीभगवानुवाच -
1a)	D1.	०त्यं for ०त्यम्
1b)	D4.	Om. ; M1. Om. सनः ।
1ab)	G3.	Om.
1c)	M1.	Om. इत॰ पूर्वम्
1d)	G4.	Om. मुनीश्वर ! ।
1cd)	D4.	Om.
1)	T2.	Om.
2a)	G4.	Om. विज्ञा
	D,D4,D5,D6,G,G1, G2,G3,G4,G6,T,T1	०दार्थम् } for ०दोत्थम्
	M.	०दोक्तम्
2b)	D1.	०हु० } for ०द्भ० ;
	D3,D4,M.	०दि०
	T1.	०द्भवम् । for ०द्भतम् ।
2c)	D4.	तद्विधम् for तत्पुनर्द्विविधम् and om. प्रोक्तम्
2d)	D4,N1.	Om.
2)	T2.	Om.
3a)	G4,T1.	चै० for त्वे०
3d)	D5.	प्राणिनामुपकारकम् ॥ for ब्रह्मैकविषयस्य तु ॥
	G4.	Om. ब्रह्मैकविषयस्य
3)	T2.	Om.

विज्ञानस्यैव शेषः स्यान्न स्वतन्त्रं न संशयः ।
कलुषीकृतचित्तानां साध्यधर्मैकगोचरम् ॥ ४ ॥
विज्ञानं कामिनां नृणां स्वतन्त्रं भाति मोहनम् ।
शब्दजन्यमपि ज्ञानं साध्यधर्मैकगोचरम् ॥ ५ ॥
न विज्ञानमिति प्रोक्तं पुरुषार्थविवर्जितम् ।
तथापि धर्मविज्ञानं न भ्रान्तं मुनिसत्तम! ॥ ६ ॥
तथाभूतार्थगामित्वात् तज्ज्ञानं चोपकारकम् ।
अधर्माज्जायतेऽनर्थस्तथा विज्ञाय मानवाः ॥ ७ ॥

4a)	G3.	०स्य वि० for ०स्यैव and ०स्य for ०स्यात्
	M1.	Om. षः स्या ; T1. ०षत्वम् for ०षः स्यात्
	D5.	तीव्रैकविषय साक्षाद् for विज्ञानस्यैव शेषः स्यात्
4b)	D.	द्विजान वेदमानजम्। for न स्वतन्त्र न सशयः।
4c)	G6.	०न्ता० for ०त्ता०
4cd)	D5.	Om.
4)	T2.	Om.
5a)	T1.	०नज्ञानि for ०न कामि ; T. मोहात् for नृणाम्
5b)	D1,D2.	०त'। for ०नम्।
5c)	M1.	Om. जन्य
5d)	M1.	०ध्या० for ०ध्य०
	G2,G5.	०र्मेण } for ०र्मैक०
	T.	०र्मादि० }
5)	D5,M,T2.	Om.
6a)	G4.	Om. न वि
6c)	D,D1,D2,D3,D4,D6,G,G1,G3,G4,G6,G7,M,M1,T,T1.	०प्य० for ०पि
6abc)	T2.	Om.
6d)	M1.	Om. ०सत्तम ! ॥ ; T2. Om न भ्रान्तम्
	D6.	ना for न
6)	D5	Om.
7a)	D1,D2.	०स्या भ्रान्ता } for ०था भूताः ;
	G,G1.	०या भ्रान्ता }
	T,T1.	०स्यापि चा }
	G4,T2.	०का० for ०गा० ; G6. Om. भूतार्थगामित्वात्
7b)	G3.	तन्तूनाम् for तज्ज्ञानम् ; G6. Om. तज्ज्ञा
7c)	G3.	०ज्ञन्य० for ०ज्ञाय०
7d)	M1,M2.	०ज्ञान च मोहनम् ॥ for विज्ञाय मानवाः ॥
7cd)	D3,G1.	Om.
7)	D6.	Om.

अधर्मपरिहाराय यतन्ते धर्मवेदनात् ।
अतो धर्मपरिज्ञानं प्राणिनामुपकारकम् ॥ ८ ॥

ब्रह्मैकविषयं साक्षाद्विज्ञानं वेदमानजम् ।
विज्ञानमेव तद्ब्रह्म स्वयमानन्द एव हि ॥ ९ ॥

आनन्दश्चेतनैः सर्वैरर्थ्यते हि निरन्तरम् ।
अतो वेदान्तविज्ञानं विज्ञानं पुरुषार्थवत् ॥ १० ॥

वेदान्तवाक्यविज्ञानात् संसारः प्रविनश्यति ।
अज्ञानं तत्प्रसूतं च खलु नश्यति वेदनात् ॥ ११ ॥

विज्ञानेन विना मुक्तिर्नैव सिद्ध्यति देहिनाम् ।
विज्ञानेन विना विद्वन्! भुक्तयश्च तथैव न ॥ १२ ॥

8b)	M1.	Om. नन्ते ; G4. Om. र्मवेद
8d)	T1.	०ज्ञा० for ०णि०
8)	D3,D5,D6,G1.	Om.
9a)	D3,D4,G3.	ज्ञानम् for साक्षाद्
9b)	D3,D4,G3.	साक्षाद्वै for विज्ञानम्
9ab)	D5.	Om.
10a)	T1.	सा० for आ०
10b)	D,D1.	०र्च्य० for ०र्थ्य०
10c)	G4.	Om. वे ;
	G3.	०नें for ०नम्
10d)	D3,D4,G3.	परमा० for पुरुषा० ; M1. Om. वत्
	M,M2.	०दम्॥ } for ०वत्॥
	D5.	०वित्॥ }
11a)	M.	Om. वेदा and विज्ञानात्
11b)	D1.	०ति० for ०वि०
11c)	G3.	०स्तु० for ०सू० ; M1. Om. तम्
11d)	M1.	Om.
12a)	D6.	०ज्ञान for ०ना ; M. Om.
12b)	M.	०र्न हि for ०नैव ; M1. Om. नैव सि
12d)	G4.	Om यश्च
	D1,D2,D3,D4,D5,D6,G,G1,G2, G3,G4,G5,G6,G7,M,M2,T,T2 }	च॥ for न॥
12)	D.	Om.

विज्ञानस्य बलेनैव खलु साक्षात् पुरन्दरः ।
सालावृकेभ्यः प्रायच्छद्यतीन् देहाभिमानिनः ॥ १३ ॥
विज्ञानस्य बलेनैव खलु त्वाष्ट्रवधः कृतः ।
विज्ञानस्य बलेनैव किं न कुर्याद्धि मानवः? ॥ १४ ॥
पुरा पूर्वकृतैः पापैः पाषण्डी कश्चिदल्पवित् ।
वेदवादरतान् हत्वा मनुष्यान् दृष्टिगोचरान् ॥ १५ ॥
यज्ञशालासहस्रं च स दग्ध्वा दृष्टिगोचरम् ।

13b) M2. Adds another reading- कि न कुर्याद्धि मानवः ?
T2. कि न कुर्याद्धि मानवः ? for खलु साक्षात् पुरन्दरः ।
13c) D6. Om. वृ ; M1. Om. लावृ
13d) G,G1,G2,G3,G4,M,M1,M2,T,T2. ०तिम् } for ०तीन्
D6. ०ति० }
D3,D4. ०त्मवादि० for ०भिमानि०
D1,D2,G,G1,G2,G4,T,T2. ०नम् ॥ for ०नः ॥
14a) D4. Om.
14b) D4. Om. खलु
G4,T2. त्वष्टृ० }
G7 त्वष्ट्रि } for त्वाष्ट्र ; D4. धश्च - । for ०धः कृतः ।
G6. त्वाष्टृ० }
G3. कि न कुर्याद्धि मानव' ? । for खलु त्वाष्ट्रवधः कृतः ।
14c) D6. ०वम् for ०व
14d) D. ०वम् ? ॥ } for ०वः ? ॥ ; M. Om. कुर्या
G7. ०वे ? ॥ }
G3. खलु त्वाष्ट्रवध. कृतः ॥ for कि न कुर्याद्धि मानवः ? ॥
15a) G4. Om. पुरा पूर्व
15c) T1. ह० } for ह०
T2. हि० }
15d) D5. यज्ञशालाश्च दग्धवान् ॥ for मनुष्यान् दृष्टिगोचरान् ॥
15) D5. Reads in prose order in place of verses No. 15-18. See under footnotes to verse No. 18 below.
16a) M1. Om. ज्ञ
16b) D2,D3,D6,G,G1,G2,G3,G4, G5,G6,G7,M,M1,M2,T,T1,T2. } प्र० for स
16ab) D5. Om.

देवताप्रतिमाः क्रोधादुत्पाट्यादाय मातरम् ॥ १६ ॥
गत्वा मोहेन तीर्थानि दूषयित्वा यथाबलम् ।
घोराण्यन्यानि पापानि चकारातीव निर्घृणः ॥ १७ ॥
कश्चिद्विज्ञानसम्पन्नः क्षुधार्तः क्षुन्निवृत्तये ।
भिक्षामादाय तस्यैव भुक्तवानोदनं गृहे ॥ १८ ॥
तस्य सर्वाणि पापानि प्रदग्धानि क्षणेन तु ।
यथा दावानले क्षिप्तं तूलं दग्धं क्षणेन तु ॥ १९ ॥

16c)	D,D3,D5,D6,G6,G7,M,M1,M2.	०माम् for ०माः
16d)	D.	०श्चा० } for ०त्वा० ;
	D1,D2,D3,D5.	०द्या० }
	G4.	Om. दाय मातरम् ॥
16cd)	T2.	Om.
16)	D4.	Om.
17a)	G.	Om. ग ;
	M1.	Om. र्थानि
17b)	M1.	Om. दूषयि
17d)	G,G2.	०र्क० for ०का०
17)	D4.	Om.
18b)	D5.	Om. वृ ;
	M1.	Om. ये।
	D1,G.	०वर्त० for ०वृत्त०
18c)	M1.	Om. भिक्षामा
18)	D4.	Reads in prose order in place of verses No. 15-18 as follows : पुरा कश्चित् पाषण्डी दृष्टिगोचरान् विप्रान् हत्वा यज्ञशालाः लक्ष दग्ध्वा देवताध्वसः तीर्थध्वस· सातृगामी च स्थित· । तस्य गृहे कश्चित् ज्ञानी क्षुधार्तो भिक्षा भुक्तवान् इति।
19a)	G4.	Om. णि पापानि
19c)	G2,G5.	हि for दा० ; M1. Om. ०त्तम्
19d)	G3.	भारम् } for तूलम् ; M1. Om.
	M,M2.	तृणम् }

पाषण्डी स पुनर्ब्रह्मन्! प्रसन्नः पार्वतीपतेः ।
प्रसादादेव सत्त्वस्थः सर्वकारणमीश्वरम् ॥ २० ॥
जगाम शरणं तेन विमुक्तोऽभवदास्तिक! ।
ब्रह्मविज्ञानिनः स्पर्शाद्विमुक्ता बहवो जनाः ॥ २१ ॥
न तुल्यं वेदनेनास्ति ब्रह्मन्! किञ्चिज्जगत्त्रये ।
वेदनेन समं साक्षाद्वेदनं केवलं खलु ॥ २२ ॥
यथा रुद्रसमं किञ्चिद्दैवतं न हि विद्यते ।
तथा वेदनतुल्यं तु न किञ्चिदपि विद्यते ॥ २३ ॥

20a) D. ०ण्डोऽस्मि for ०ण्डी स ;
M. न for स
D4. विप्रप्रसादात् पाषण्डी for पाषण्डी स पुनर्ब्रह्मन् !
20b) G6 Om. पार्वतीप
D4. जगाम शरण शिवम् । for प्रसन्न. पावतीपते· ।
20c) G3. ०स्थम् for ०स्थ·
D4. तत. प्रसन्नो भगवान् for प्रसादादेव सत्त्वस्थ.
20d) M1. Om. श्वरम् ।
D4. तेन मुक्तोऽभवद्बुध ! ॥ for सर्वकारणमीश्वरम् ॥
21a) G2,G5. त्वेनम् for तेन ; M1. Om. जगाम शरणम्
21b) G5 Om दा
D,D6,G6,G7,M,M1,T2. ०क. । for ०क ! ।
21ab) D4 Om
21c) G2,G5 ०ह्माभि० for ०ह्मवि० and ०नाम् for ०नः
22a) G4. स for न ; G6. Om. न तु
D. ०ल्यो } for ०ल्यम्
G. ०ल्य० }
22b) M2. कि च for किचित् ;
M1. Om. ज्ञग
22d) D. ०ना for ०नम् } for किचिदपि
23d) D3. हि किचित्र }
D4. हि किंचन
23cd) D,D1,D2,D5,D6,G,G1,G2,G3, G4,G5,G6,G7,M,M1,M2,T,T2. } Om.

यथा ब्राह्मणतुल्यस्तु मानवो न च विद्यते ।
तथा वेदनतुल्यं तु न किञ्चिदपि विद्यते ॥ २४ ॥

यथा संन्यासतुल्यस्तु नाश्रमो विद्यतेऽनघ! ।
तथा वेदनतुल्यं तु न किञ्चिदपि विद्यते ॥ २५ ॥

यथा यज्ञसमं कर्म विद्यते न हि सत्तम! ।
तथा वेदनतुल्यं तु न किञ्चिदपि विद्यते ॥ २६ ॥

24a) D6. त० for य० ; G4. Om. स्तु

24b) G6. Om मानवो , M1. Om. न
D3,D5,G3. हि for च

24ab) M. Om.

24c) T1. ०ल्यस्तु for ०ल्य तु

24d) D3. हि किंचिन्न
D4,G4,M1,T2. हि किंचन } for किंचिदपि
D5. हि कश्चिन्न
T1. वेद्यो हि नहि for न किंचिदपि

24cd) D,D1,D2,D6,G,G1,G2,G3,G5,G6,G7,T. Om.

25b) D. आ } for ना
G2,G5. स्वा
D5. न हि विद्यते। for विद्यतेऽनघ!।

25ab) G7 ०ल्य तु न किंचिदपि विद्यते। for
०ल्यस्तु नाश्रमो विद्यतेऽनघ!। ; G3. Om.

25c) D1,D2. विज्ञा० for वेद० ;
M1. Om. वेद न तु

25d) D,D1,D2,D3,D4,G,G1,G2,G3,G5,G6,M1,M2,T. हि किंचन
D5. हि कश्चिन्न } for किंचिदपि
D6. कि च न हि

25cd) G7. Om.

25) M. Om.

26ab) G3. सन्यासतुल्यस्तु नाश्रमो विद्यतेऽनघ!। for
यज्ञसम कर्म विद्यते न हि सत्तम!।

26c) D1. विज्ञा० for वेद० } for किंचिदपि

26d) D,D1,D2,D3,D4,D6,G,G1,G2,G3,G5,G6,G7,T. हि किंचन
D5. हि कश्चिन्न

26cd) G4,M,T2. Om

26) G6. Reads 26 twice

यथा गङ्गासमा नास्ति नदी लोकत्रयेऽपि च ।
तथा वेदनतुल्यं तु न किञ्चिदपि विद्यते ॥ २७ ॥

पञ्चाक्षरसमो मन्त्रो यथा नास्ति महामते! ।
तथा वेदनतुल्यं तु न किञ्चिदपि विद्यते ॥ २८ ॥

यथा भस्मसमं नास्ति भेषजं भवरोगिणाम् ।
तथा वेदनतुल्यं तु न किञ्चिदपि विद्यते ॥ २९ ॥

ब्रह्महा मद्यपः स्तेयी तथा स्वगुरुतल्पगः ।
वेदनेनैव पापेभ्यो मुच्यते नात्र संशयः ॥ ३० ॥

विद्यायां यतमानस्य बहुविघ्नो विजायते ।

27a) M1 — Om. मा ना

27c) D1. — विज्ञा० for वेद०

27d) D,D1,D2,D3,D4,G,G1,G2,G3,G5,G6,T. — हि किंचन for किंचिदपि

27cd) D5. — Om.

28b) M1. — Om. महा

28c) D1,D4. — विज्ञा० for वेद० ; M1. Om. दन तुल्य तु

28d) D1,D2,D3,D4,G3. — हि किंचन for किंचिदपि

28cd) D,D5,D6,G,G1,G2,G5,G6,G7,T. — Om.

29b) G6. — Om. जम् ; D1. बहु for भव०

29c) D1. — विज्ञा० for वेद० ; G4 Om.

29d) D1,D2,D4,G,G1,G2,G3,G5,G6,G7,T — हि किंचन } for किंचिदपि
D5. — हि कश्चिन्न }

G4. — Om. न किञ्चिदपि

29cd) D,D6. — Om. }
30a) D3,D4,G3,M,M1,M2. — ०न: } for ०यी

D5,D6,G,G1,G2,G6,G7 — ०य.

30b) D1,D2. — ०थैव for था स्व० ; M1. Om. तथा स्वगुरुत

30c) M1 — Om. वेदवे

30d) G5. — ०च्यन्ते for ०च्यते

D,D3,D4,D5,D6,G,G1,G2,G3, G4,G5,G6,G7,M,M1,M2,T,T2. } न हि for नात्र

31a) T1. — ०र्थम् for ०याम् ; M1. Om. तमान

31b) G6. — न }
G7. — नु } for वि ; M1. Om. यते।

धैर्येणैव परां विद्यां साधयेदादरेण च ॥ ३१ ॥
यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान् न हन्ति न निबध्यते ॥ ३२ ॥
भक्ष्ये भोज्ये च लेह्ये च पेये चोष्ये च पिच्छिले ।
ब्रह्मविज्ञानसम्पन्नो विशेषं नैव पश्यति ॥ ३३ ॥
शुद्धयशुद्ध्यादिवैषम्यं ब्रह्मविज्ञानिनो न हि ।
ब्रह्मविज्ञानहीनानां देहाद्यात्माभिमानिनाम् ॥ ३४ ॥

31c) G4. Om. धैर्ये ; G5. तधैक्येन for धैर्येणैव ; M1. Om.
31d) M1. Om मा ; M2. धार० for साध०
G4. Om. येदादरेण च॥
D,D3,D4,D5,G6. तु॥ for च॥
32a) G4. Om. यस्य नाहकृतो भा
32b) G4. Om. लिप्यते। ; G5. विद्य० for लिप्य०
32c) G2,G5. तु for ०पि ; G7. च for स
33a) M1. Om. ज्ये
D5. ०क्ष्याभक्ष्यविवेकस्तु for ०क्ष्ये भोज्ये च लेह्ये च
33b) G4. Om. पि
T2. प्रि० for पे० and प्रिये -। for पिच्छिले। ; D5. Om.
33c) D5. ०हीनानाम् for ०सपन्नो
33d) T1. वैषम्यम् for विशेषम्
D1,D2,G,G1,T. न हि } for नैव ;
G2,G5. स हि }
D,D4. ह्यविशेणै० for विशेष नै०
D3,D6,G3,G6,G7,T2. ०षेणैव० for ०ष नैव ; G4. Om. ; D5 Om.
34a) D,G,G3. शुध्याशुध्या }
D1,D2. शुद्धाशुद्धा० } for शुद्धयशुद्ध्या०
G2,G5. मध्यशुद्धया० }
D1,D2. ०शेष्यम् for ०षम्यम् ; D5,G4. Om.
34b) G4. Om. ब्रह्म ; M1. Om. ह्यविज्ञा ; D5. Om.
34d) T1. स्वदेहाद्य० for देहाद्यात्मा०
M1. ०द्य० for ०त्मा० ; D5. Om

वर्णाश्रमादयो भावा विद्यन्ते खलु सत्तम! ।
वर्णाश्रमादिनिष्ठानां वेददृष्टेन वर्त्मना ॥ ३५ ॥
भक्ष्यभोज्यादिवैषम्यं सङ्ग्राह्यं हि विशेषतः ।
देहसम्बन्धवैषम्यं देहाभावान्न योगिनः ॥ ३६ ॥
इन्द्रियाद्यभिसंसृष्टिस्तदभावात् तथैव च ।
मनःप्रयुक्तं नैवास्ति तदभावात् सुयोगिनः ॥ ३७ ॥
बुद्ध्यहङ्कारदोषोऽपि तथा नास्त्येव योगिनः ।

35b) D3,D4,D5,G3,G4,M,M1,M2,T1. ०न्ततम्। for ०त्तम!।
35c) M1. Om. मादि
35d) D6. Om. द ; D. ०निष्ठे० for ०दृष्टे०
36a) G4. Om. भोज्यादिवैषम्यम्
36b) D6. ०गृह्य for ०ग्राह्यम् ; D5. Om. हि
T2. अ० for हि ; G4. Om.
36c) G5. ०बद्ध० for ०बन्ध० ; G4. Om. देहसबन्ध
36d) M1. Om. देहाभा ; G6. Om. वान्न योगिनः॥
37a) G6. Om. इन्द्रिया
G,G1,G2,G3,T,T1. ०स्पृ० } for सृ
D6. ०तृ० }
D5,G3,G4,M,M1,M2,T2. ०ष्टम् for ०ष्टि·
37b) G,G1,T. ०दा० } for ०द०
G2,G5,T1 ०था० }
D3,D4,D6,G2,G3,G5,G6,M1,M2 न। } for च।
D5. मा। }
G7,M नः। }
T1. हि। }
37c) M. ०क्तमे० for ०क्तनै०
37d) G7,M. ०दा० } for ०द० ;
G5 ०था० }
D,D1,D4. तु for सु०
38a) M1. Om. हकार ;
G4. Om. ०पि ; G3. हि for ०ऽपि
38b) G6. Om. नास्त्येव योगिनः। ; G4. Om.

तथा सङ्घातजो दोषो नैव शुद्धात्मवेदिनः ॥ ३८ ॥
ब्रह्मविज्ञानिनो विद्वन्! सङ्घातो न हि विद्यते ।
दृश्यरूपमिदं सर्वं तद्रूपं परिपश्यतः ॥ ३९ ॥
कथं दोषस्य सद्भावः? कथं वा तस्य दर्शनम्? ।
व्यवहारदशा पश्यन्नपि सर्वं चराचरम् ॥ ४० ॥
तत्त्वदृष्ट्या तदेवेदं ब्रह्म पश्यति तत्त्ववित् ।
व्यावहारिकदृष्टिश्च तत्त्वदृष्टिश्च योगिनः ॥ ४१ ॥
तथा स्वात्मप्रधानान्या तद्धि वेदान्तवेदनम् ।
इदं वेदान्तविज्ञानं केचिदद्वैतवादिनः ॥ ४२ ॥

38c) G6. Om. तथा सघातजो ;
D1,D2. ०दोषोऽपि for ०जो दोषो
38d) M2. ०द्धचा० for ०द्धा० ; G2,G5. ०वा० for ०वे०
G3. ०नाम्॥ } for न ॥
M2. ०भिः ॥ }
39b) G3. नैव } for न हि ; M1. Om. घातो न हि विद्यते।
M. ०पि न }
39d) D1,D2,G,G1,G4,G5,T,T1,T2. दृग्रू० } for तद्रू० ; G3. ०दृ० for ०प० ; G6 Om.
D3,D4,G3. चिद्रू० }
40a) G6. Om.
40b) G6. Om. कथ वा तस्य ; G4 Om
40c) D4. ०दशाम् for ०दृशा ; D. सर्वे for पश्यन्
40d) M1. Om. पि सर्व चराचरम्।
41b) D5. बहु for ब्रह्म ; T1. ०त for ०वित्
41c) T1. ०ष्टे० for ०ष्टि० ; G6 Om
42a) G6. Om. तथा स्वात्मप्र ; D. ०भान० for ०धाना०
D3,D4. ०न्यत् for ०न्या
D6 ०नत्वात् } for ०नान्या
D5,G3,G4,T2. ०नाद्या }
42b) M1. Om. वे, the first.
42c) G4. Om. विज्ञानम्
42d) G4. Om. केचिदद्वैत ; G6. Om. द

अवलम्व्यान्यथोपायं प्रवदन्ति विमोहिताः ।
उपायोपेयभावस्तु शास्त्रादेव हि केवलम् ॥ ४३ ॥
ज्ञायतेऽतीन्द्रियार्थं को विद्याद्विद्यामृते पुमान्? ।
सर्वज्ञोऽपीश्वरश्चापि विरुद्धार्थं कदाचन ॥ ४४ ॥
न वदेद्भक्ति चेद्भ्रान्तं हृदि कृत्वाब्रवीद्धरः ।
वेदाधिकारहीनस्य भ्रान्तस्य मनुजस्य तु ॥ ४५ ॥

43c) G6. Om. पायोपेयभावस्तु

43d) G6 Om. शास्त्रादेव हि

44a) M,M1,M2 जा० for ज्ञा०

D. केवल ज्ञातवानर्थम्
D1,D2,G,G1,G2,G5,G6,T. जायते मोक्षसिद्ध्यर्थम्
G7. ज्ञायते मोक्षसिद्ध्यर्थम्
D3,D4. केवलज्ञोऽतीन्द्रियार्थे
G3. केवल ह्यतीन्द्रियार्थे
T2. केवल ज्ञायतेऽन्यार्थम्
D5 कवल ज्ञापनीयार्थम्
D6 केवल ज्ञायन्यार्थ -
} for ज्ञायतेऽतन्द्रियार्थ को

44b) D,D1,D2,D3,D4,D5,D6,G,G1,G2,G3,G4,G5,G6,G7,T,T2 कोऽपि विद्यामृते
T1 विद्याच्छास्त्रमृते
} for विद्याद्विद्यामृते

44c) M,M1,M2,T1. ०र' श्रुत्या for ०रश्चापि

44d) M1. Om. विरु

45a) D4. न च वेदोक्तिवद् for न वदेद्भक्ति चेद्

D1,D2,G,G1,G2,G5,G7,T. ०न्तिम् for ०न्तम् ;

G6 Om. चेद्भ्रान्तम्

45b) G6. Om हृदि कृत्वाब्र

D,D3,D5,D6,G3,G4,M1,T1 ०त्रम् ।
D4,G6,G7,T2. ०त्रः ।
G5. स्थिरम् ।
M. परम् ।
M2. पुरः ।
} for ०द्धरः ।

45d) T2. च ॥ for तु ॥

वक्ति श्रुतिविरुद्धार्थं सर्वज्ञः करुणाकरः ।
पारम्पर्यक्रमेणैव वेदमार्गं च गच्छति ॥ ४६ ॥
ईश्वरेणैव मार्गस्थः सात्त्विकस्तत्र भक्तिमान् ।
अतो वेदान्तविज्ञानादेव ब्रह्मैकगोचरात् ॥ ४७ ॥
साक्षान्मुक्तिमवाप्नोति नेतरेण न संशयः ।
उपायः परविद्यायाः साक्षाद्वेदेन दर्शितः ॥ ४८ ॥
स्मृत्या तन्मूलया नान्यः सत्यमेव मयेरितम् ।
यथावज्ज्ञानमाहात्म्यं न शक्यं वर्णितुं बुध! ॥ ४९ ॥

46a)	G4.	भ० for व० ; M1. Om. श्रुति
46c)	G7.	यस्य for ०पर्य० , G4. Om. णैव
46d)	G4.	Om. वेदमार्गं च ; G6. Om. र्गं च गच्छति ॥
	D6.	न for च
47a)	D,D1,D2,D3,D4,D6,G, G1,G2,G5,G6,G7,T,T1	०णोंक्क० ०णैव
	D5.	०णैक० ०णैव
	G6.	Om. ईश्वरे ; D. ०र्गेण for ०र्गस्थः
47b)	D5.	शिव० for तत्र ; M1. Om. त्र भक्ति
47d)	D,D1,D2,D3,D4,D6,G,G1,G7,T.	०ज्जीव० for ०देव०
	D1,D2,T.	०क्य० for ०क०
	G2,G5.	०त्सर्वससारमोचनात् ॥ for ०देव ब्रह्मैकगोचरात् ॥
48a)	M1.	Om. क्षा ; G6. Om प्नोति
48b)	G6.	Om. नेतरेण न स
48c)	M1.	Om. परविद्यायाः
48d)	G4.	Om. द्वेदेन दर्शित ॥
	D5.	०दान्त० for ०देन
49a)	G4.	Om. स्मृ ; M,M1. ०न्यत् for ०न्य०
49b)	M.	०न्योदितम्। for ०येरितम्। ;
	M1.	Om. रितम्।
49c)	D3.	त० for ०य०
	D3,D4,D5,G3,G4,T1,T2.	०विज्ञा० for ०वज्ज्ञा० ;
	M1.	Om. त्म्यम्
49d)	G6.	Om. वर्णितु बुध ! ॥ ; M1 Om.

तस्मात् सर्व परित्यज्य ज्ञानतीर्थो भवेद्विजः ॥

॥ इति श्रीस्कान्दे पुराणे सौरसंहितायां नवमोऽध्यायः ॥

50a) G6. Om. तस्मा ; M1. Om. तस्मात् सर्वम्

50b) G6. Om. न ; D3,D4,D5. ०निष्ठो for ०तीर्थो

M1,T2 ०व० for ०वेत् ; D5. ०चरः। for ०द्विजः।

M,M1,T2. ०ज for ०जः

Colophon :

M1,M2. इति

D3,D4,G3. इति स्कान्दे

D5,T1. इति स्कन्दपुराणे

D1. इति श्रीस्कन्दे महापुराणे

D2,G,G5. इति श्रीस्कान्दे महापुराणे

D,G1,G2,T,T2. इत्यादिमहापुराणे स्कान्दे

D6,G4,G5. इति महापुराणे श्रीस्कान्दे

G7. इति महापुराणे स्कान्दे

} for इति श्रीस्कान्दे पुराणे

D6. सूर० for सौर० ; G4. Om. रसहिताया नवमोऽध्याय· ॥

M1. Om. सौरसहितायाम्

D3. ज्ञानमाहात्म्य नवमोऽध्याय· ॥

D6,G,G1,G2,G3, G5,G6,G7,T,T2. ज्ञानतीर्थवर्णन नाम नवमोऽध्यायः ॥

D5. ज्ञानतीर्थवर्णन नामाष्टमोऽध्याय· ॥

} for नवमोऽध्यायः ॥

॥ अथ दशमोऽध्यायः ॥

श्रीभगवानुवाच

अथातः सम्प्रवक्ष्यामि तवाहं करुणावलात् ।
ज्ञानोपायं समासेन वेदेनैव प्रदर्शितम् ॥ १ ॥

ज्ञान्तिर्दान्तिश्च संन्यासः परहंससमाह्वयः ।
द्वन्द्वादीनां सहिष्णुत्वं चैकाग्र्यं भस्मगुण्ठनम् ॥ २ ॥

त्रिपुण्ड्रधारणं तिर्यक् श्रद्धा रुद्रस्य पूजनम् ।
गुरुशुश्रूषणं शौचं मिताहारश्च सत्यता ॥ ३ ॥

Before1a)	G,G1,G3,M,M2,T.	श्रीभगवान् -
	D,D3,D6.	भगवानुवाच - } for श्रीभगवानुवाच-
	D5.	रविः -
	M1.	Om. श्रीभगवानुवाच -
1a)	G2,G3,G5.	०हम् for ०तः
1b)	D4.	ज्ञानोपाय श्रुतीरितम्। for तवाह करुणावलात्।
1c)	M1.	Om. ज्ञानोपा
1d)	D5.	०दान्तेन } for ०देनैव
	G3.	०दानेन }
1cd)	D4.	Om.
2b)	T2.	प्रसेदुश्च for परहम. ; G6. Om. रहससमाह्वय।
2c)	M,M1,M2.	वस्वा० for द्वन्द्वा० ;
	G4	Om. द्वादीना सहिष्णुत्वम्
2d)	D,D6.	ऐ० } for चै० ; M1 Om. का
	G2,G3,G5,G7,T2.	त्वै० }
	D5,D6,G,G1,G2,G3,G5,G6, G7,M,M1,M2,T,T1,T2 }	०कु० for ०गु० ; G4. Om.
3a)	G4.	Om. त्रिपुण्ड्रधा
3b)	D5.	भक्त्या for श्रद्धा ;
	D3,D4,G3,G7.	०ने। for ०नम्।
3c)	D5,G4,M,M1,M2,T2	०रो for ०रु०
3d)	D2.	०रोह्यसङ्गि० for ०रश्च सत्य०
	G7.	०त्त्व० for ०त्य० ,
	G6.	Om. सत्यता ॥

अहिंसा सत्यमस्तेयं ब्रह्मबुद्धिर्दयार्जवम् ।
प्रामाण्यं सर्ववेदानां धैर्यं विप्रक्षमापि च ॥ ४ ॥
आस्तिक्यं च तपो दानं सन्तोषमतिरेव च ।
वेदान्तश्रवणं तर्कैः श्रुतार्थस्य च धारणम् ॥ ५ ॥
लोकवेदविरुद्धार्थे लज्जा तारजपस्तथा ।
अक्षदर्शनसम्बन्धलक्षणादिविवर्जनम् ॥ ६ ॥

4a)	M1.	Om. हिम् ; G6. Om. अहिंसा सत्य
4b)	D5.	०चर्यम् for ०बुद्धिः ; G6. Om. या
	T2.	०नम्। for ०वम्।
4c)	G3,G4,M,M1,M2. G6.	०ण्ये ०णम् } for ०ण्यम् ; D1. ०देवा० for ०वेदा०
4d)	T.	०प्रे for ०प्र०
	D5.	दान तपः क्षमा ॥ for विप्रक्षमापि च ॥
	G4	Om क्षमापि च ॥
5a)	G4.	Om.
	D5.	सतोषो दम आस्तिक्यम् for आस्तिक्य च तपो दानम्
5b)	G4.	Om. सतोषमतिरे ; M1. Om. सतोषम
	D5.	वेदान्तश्रवण सदा। for सतोषमतिरेव च।
5c)	M1.	Om. वे ;
	G6.	Om. श्रवण तर्कै ; G4. Om तर्कैः
	T2	कार्यम् for तर्कै
	D5.	श्रुत्यनुग्राहतर्कैश्च for वेदान्तश्रवण तर्कैः
5d)	G2,G5,T1.	०स्याव० for ०स्य च० ; G6 Om. श्रुतार्थः
	D5.	श्रुतस्याथावसा० for श्रुतार्थस्य च धा०
6b)	D.	लज्जेय रूपत० for लज्जा तारजप०
	D5.	०पजप। for ०पस्तथा।
6c)	M1.	Om दर्शनसब ;
	D.	०द्ध० for ०न्ध०
	G5.	०न्धे for ०न्ध०
6d)	D1,D2,G3,G4,T,T1. G6.	ई ०मी० } for ०ल०
	M.	०ण लक्षणादि च ॥ for ०णादिविवर्जनम् ॥
	T1.	०र्जितम् ॥ for ०र्जनम् ॥
6cd)	D5.	Om.

प्राणायामस्तथा शम्भोः शिवस्य परमात्मनः ।
मूर्तिध्यानं च हृत्पद्मे प्रत्याहारश्च धारणा ॥ ७ ॥
समाधिस्तीर्थसेवा च शिवक्षेत्रेषु वर्तनम् ।
वेदबाह्येषु मार्गेषु श्रद्धाभावस्तथैव च ॥ ८ ॥
अन्ये च वेदसंसिद्धा धर्माः सर्वे मुनीश्वर! ।
उपायास्त्वन्तरङ्गाश्च स्मार्ताः पौराणिका अपि ॥ ९ ॥

7a)	D5.	०मादि शम्भोरधु for ०मस्तथा शम्भो
	G4.	Om. स्तथा शम्भो
7b)	G6.	Om.
7c)	G6.	Om. मू
7d)	D5.	०गादि for ०रश्च
	G6.	०णम् ॥ for ०णा ॥
	M1.	Om. धारणा ॥
8a)	M1.	Om. समाधिर्म्तीर्थमे
8c)	D5.	०व्राह्मे० for ०बाह्मे०
8d)	D5.	शिवस्मृति· ॥ for तथैव च ॥
	G6.	Om. श्रद्धाभावस्तथैव
9a)	M.	०पि for च
	D5.	वेदशास्त्रपुराणोक्तात् for अन्ये च वेदससिद्धा
	G4,T2.	०द्ध० for ०द्धा
	M.	०सिद्धान्ता· for ससिद्धा
9b)	M,T1.	सर्वे धर्मा for धर्मा. सर्वे
	M1.	.धर्मा for धर्मा सर्वे and om. मुनीश्वर !
	T2.	०र्मास्त्वन्ये for ०र्माः सर्वे
	G4.	Om. सर्वे मुनीश्वर !
	D5.	आचाराथ सज्ञित. । for धर्माः सर्वे मुनीश्वर !
9c)	D5.	Om. स्त्व ;
	G4.	Om. उपायास्त्वम्
	D3,G3,M,M2.	०या अन्त० for ०यास्त्वन्त०
	M1.	०या ..न्त० for ०यास्त्वन्त०
9d)	D5.	वेदवेदान्तवेदने ॥ for स्मार्ता· पौराणिका अपि ॥

नित्यकर्मण्यपि ब्रह्मन्! उपाया ऋतसंस्थिताः ।
श्रौतस्मार्तातिरिक्तास्तु बाधका हि विवेदने ॥ १० ॥
महापापवतां पुंसां श्रौतस्मार्तविलक्षणे ।
वाञ्छा विजायते नित्यं स्वभावेन द्विजोत्तम ॥ ११ ॥

10a) D,D1,D2,D3,D4,D6,G,G1,G2, G3,G5,G4,G6,G7,M,T,T1,T2. } ०र्मा० for ०र्म० ; G6 Om. ण्यपि ब्रह्मन्

10b) D. ०यानृत०
D6. ०यान्नृत०
D2. ०यानृजु०
D1. ०या ऋतु०
D4. ०या श्रुति०
G. ०या इति०
G3. ०या मत०
G4,T2. ०यार्जित०
G7. ०या...त०
M,M1,M2,T1. ०या दूर०
} for ०या ऋत०

D1,D2,G. ०तम्। } for ०ताः। ; G6. Om. उपाया ऋतस
G1,T. ०त। }

10d) D,D6. न for हि

D. ०चनम्॥ } for ०दने॥
D6. ०किन॰॥ }

D3,D4,G3,G4,T2 मुनिसत्तम! for हि विवेदने॥

M,M2. ज्ञानोत्पत्तेस्तु साधकाः॥ } for बाधका हि विवेदने॥
M1,T1. ज्ञानोत्पत्तेस्तु बाधका.॥ }

10) D5. Om.

11a) D,D5,T1. नृणाम् for पुसाम्

11b) G4. Om. विल ; G7. Om. णे।
D5. श्रौतेषु मतिर्भवेत्। for श्रौतस्मार्तविलक्षणे।

11c) G,M,M1,M2,T,T1,T2. ०पि for वि० , G6. Om.
G4. Om. विजायते नित्यम् ;
G3. ०त्या for ०त्यम्

11d) G4. Om स्वभावेन ;
G6. Om. स्व
M,M1,M2,T1. ०वादेव सत्तम!॥ for ०वेन द्विजोत्तम!॥
T1. सस्कारादेव सत्तम!॥ for ०भावेन द्विजोत्तम!॥

11cd) D5. Om.

पूर्वपूर्वार्जितैः पुण्यैः श्रौतस्मार्तेषु कर्मसु ।
वाञ्छा विजायते नित्यं स्वभावेन द्विजोत्तम! ॥ १२ ॥
शिवाराधनबुद्धयैव नित्यकर्माणि सत्तम! ।
पूर्वपूर्वार्जितैः पुण्यैः श्रौतस्मार्तेषु कर्मसु ॥ १३ ॥
शीघ्रं विज्ञाननिष्पत्त्यै भवेयुर्न हि संशयः ।
विध्युक्तमिति बुद्धया ये कर्म कुर्वन्ति सादरम् ॥ १४ ॥
मन्दं मन्दं शिवज्ञानं तेषामात्मनि जायते ।
नित्यकर्माद्यनुष्ठानात् पापानि सुबहूनि च ॥ १५ ॥

12a) D5. ०जन्मा० } for ०पूर्वा०
G4,T2. ०पुण्या० }
G7. ०र्वोस्थि० } for ०वार्जि०
M,M1,M2. ०वाच्छि्र० }
12c) D5. हि } for विं०
G,M. ०पि }
12d) G6. Om. न द्विजोत्तम ! ॥
12cd) T. Om.
12) G3. Om.
13a) G6. Om. शिवाराधनबु ; M1. Om. बु
13b) M1. ०त्यम् for ०त्य०
13ab) T. Om.
13cd) D,D3,D4,D5,D6,G3,G4, G6,M,M1,M2,T,T1,T2. } Om
14a) G5. ०त्रे for ०त्त्यै ; G4. Om. निष्पत्त्यै
14b) G4. Om.
14c) G4. Om. विध्युक्तमिति
D5 वा } for ये
T2. वै }
15a) D6. ०वम् } for ०व० ; G6. Om.
G5. ०वा० }
15b) M1. ०ज्ञनि योज० for ०त्मनि जाय०
G6. Om तेषामात्मनि जा
15d) G1. ०महान्ति for ०वहूनि ;
D5. ०न्यपि ॥ for ०नि च ॥

विनश्यन्ति न सन्देहः शास्त्रं प्राह तथा खलु ।
नराणां क्षीणपापानां चित्तं शुद्धं भवेत् ततः ॥ १६ ॥
संसारहेयताज्ञानं वैराग्यं जायते पुनः ।
वेदनेच्छा मुने! तीव्रा जायते चानपायिनी ॥ १७ ॥
तया पापानि सूक्ष्माणि विनश्यन्ति च कानिचित् ।
जिज्ञासुर्यामवाप्नोति गतिं मर्त्यस्तपोधन! ॥ १८ ॥

16a) M1. Om. हः

16b) M1. Om. शास्त्रम् ; G7. Om. ह तथा खलु ।

16c) G4. Om. नराणा क्षीण , G6. Om. नराणा क्षीणपापा

16d) D5. Om. चि ;

D,D6. चित्तशुद्धि॰ for चित्त शुद्धम्

D3,D4. य॰ for त॰ ; M1. Om. तः ।

17b) D. ततः । } for पुन. ।
T1. यतः । }

17c) D. महत्॰ for मुने ! ; M1. Om. दनेच्छा मुने !

G6 Om. च्छा मुने ! । तीव्रा

G4,T2 ॰व्रम् for ॰व्रा

17d) D6,G7. वा॰ } for चा
D1,G4. या॰ }

T1. ज्ञानदायिनी ॥ for चानपायिनी ॥ ; G6 Om.

18a) D6,G7 ॰था for ॰या

D. सूक्ष्माणि पापानि for पापानि सूक्ष्माणि ; G6. Om.

18b) D3,D4,G3. न सशयः । for च कानिचित् । ;

T1. ॰न्त्येव for ॰न्ति च

D5. सर्वशः । for कानिचित् । ; G4. Om. च कानि

M1. Om. च का ; G6. Om. विनश्यन्ति च कानि

18c) D. ॰साया॰ } for ॰सुर्या॰ ; G4. Om. मवा
G4,T2. ॰सन्त॰ }

M1. Om. वाप्नोति

18d) T,T1. म॰ for ग॰

D5. न ता सर्वमहामखै. ॥ for गति मर्त्यस्तपोधन ! ॥

D6. ॰नः ॥ for ॰न ! ॥ ; M1. Om.

न तां गतिमवाप्नोति सर्वैरपि महामखैः ।
जिज्ञासार्थं यतन्ते ये श्रद्धया ब्राह्मणोत्तमाः ॥ १९ ॥
तेऽपि साक्षान्महादेवं यजन्ते न हि संशयः ।
ये यजन्ते महादेवं पशूनां पतिमीश्वरम् ॥ २० ॥
त एव हि मुने! यज्ञैर्यजन्ते नेतरे जनाः ।
साक्षाद्ध्वरराजानं विना ये देवतान्तरम् ॥ २१ ॥
यजन्ते ते वृथा यज्ञं प्रकुर्वन्ति न संशयः ।
प्रत्युतानर्थमप्यग्रे प्राप्नुवन्ति न संशयः ॥ २२ ॥

19a)	M1.	Om. न ता गति
19b)	G6.	Om. वैरपि महामखैः ।
19ab)	D5.	Om.
19c)	G6.	Om.
19d)	G6.	Om. श्रद्धया ब्राह्मणो
	D1,D2,G,G1,T.	०म ॥ for ०माः ॥
20a)	D3,D4,D5,G3.	हि for ०ऽपि ; M1. Om. न्महादे
20b)	D1,D2.	०त० for ०ज०
20c)	G4	Om. महादेवम्
20d)	G4.	Om. पशू ; G6 Om. तिमीश्वरम् ॥
20cd)	D,M.	Om.
21a)	D6.	Om. व ; D1,D2. महा० for मुने !
21b)	D5,G7.	०त० for ०ज० ; M1. Om. तरे ज
21ab)	G6.	Om.
21c)	G6.	Om. साक्षाद्
21d)	G3.	ये विना for विना ये ;
	G2,G5.	मुक्त्वा for विना
	T1.	यदे for ये दे०
21)	D,M.	Om.
22a)	G3	विना for वृथा ; G6. Om. यज्ञम्
22ab)	M.	Om.
22c)	D1,D2,D5,M,M1,M2.	०प्युग्रम् }
	T1.	०त्युग्रम् } for ०प्यग्रे , M1. Om मप्य
	G3,G4,T2.	०व्यग्रम् }
22cd)	G6,G7.	Om.
22)	D.	Om.

यथा दक्षो महानर्थं प्राप्तवानतिदारुणम् ।
सोमेनाराधयेद्देवं सोमं सोमविभूषणम् ॥ २३ ॥
सोमयागेन सोमोऽसौ सुप्रसन्नो भवेन्नृणाम् ।
सर्वयज्ञाधिपः साक्षात् सोमः सोमार्धभूषणः ॥ २४ ॥
तस्य शेषतया देवा द्विजैरिज्या न हि स्वतः ।
ये यजन्ते च तन्त्रस्थास्तन्त्रस्थं देवतान्तरम् ॥ २५ ॥
रुद्रमेव यजन्ते ते तथा ह्यविधिपूर्वकम् ।
वैदिका वेदविधिना यजन्ते परमेश्वरम् ॥ २६ ॥

23a) G4. Om. यथा द ; G6. Om.
23b) D1. ०प्त ते० for ०प्तवा० ; D2. Om. वा
23c) M. ०धार० for ०राध०
D. ०यन् दे०
D6. ०ये दे० } for ०येद्दे०
G3. ०यद् दे०
23d) M1. Om. मविभूषणम्
24ab) G6. Om.
24d) D,T1. ०मवि० for ०मा र्ध०
25a) D6. ०ह्यशेषि० for ०स्य शेष० ; G4. Om शेषतया देवा
M1. Om. शेषतया
25b) D3,D4,G3. हि न } for न हि ; T1. च for हि
D6. ०रभि०
G4 Om द्वि ; G6. Om. जैरित्या न हि स्वतः
25c) G4,T2. ०न्ति for ०न्ते ; D,D6 म० for त०
D5,M,T2. ०त्र० for ०न्त्र० ;
G7. Om. ये यजन्ते ; G6. Om.
25d) D1,M. ०त्र० for ०न्त्र० ; G6. Om. स्तन्त्रस्थ देवता
T2 Om. ; D6. ०ता व० for ०तान्त०
26b) G3. हि } for ह्य० ; M1. Om. विधिपूर्वकम् ॥
M1. ०प्य०
26c) M1. Om. वैदि
26d) M,M1. ०जेत for ०जन्ते ; G6. Om. मेश्वरम् ॥
26) T2. Om.

तत्र तत्र च मर्त्यानां सा ह्येव स्थितिरास्तिक! ।
वेदमार्गात् परिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः ॥ २७ ॥
नरो मरणभीतो यस्तन्त्रेणाराधयेद्धरम् ।
विष्णुं ब्रह्माणमन्यं च नरस्तन्त्रोक्तवर्त्मना ॥ २८ ॥
वेदवादपरिभ्रष्टः पूजयेदादरेण तु ।
वैदिको वेदसिद्धेन वर्त्मना केवलेन तु ॥ २९ ॥
पूजयेदादरेणैव शङ्करं देवतोत्तमम् ।

27a) G2,G5. ०द्धि तत्र } for ०त्र तत्र ; G7. Om. तत्र, the first.
D3,D4,D5,M2. ०त्र चात्र }
27b) G. ०का। } for ०क!
D6. ०कः। }
27ab) G6. Om.
27c) D3,D4,G3. ०र्गप० for ०र्गात् प० ; G4. Om. वेदमार्गपरिभ्र
G6. Om. वेदमार्ग
27d) D,G4,M,M2. ०प्य० for ०ष्व० ; D5. ०त्ते भवे० for ०त्तेष्वनु०
M1. Om प्रायश्चित्तेष्वनु
D6,G3,T1. पूजयेदादरेण तु ॥ for प्रायश्चित्तेष्वनुन्मुख. ॥
27) T2. Om.
28a) D,D3,D4,D5,G4,M,M1,M2. ०त्या for ०तो
28b) G2,G5. ०रिम्। for ०रम्।
28c) G5. ०मीशम् for ०मन्यम् ; D5. वा for च
G6. Om ब्रह्माणमन्य च
28d) G6. Om.
28) D6,G3,T1,T2. Om.
29a) D5. ०मार्ग० for ०वाद० ;
M1. Om भ्र ; G6. Om.
29b) D5. Om. ण ; G6. Om पूजये
29ab) D6,G3,T1. Om.
29c) D5. ०वि० for ०सि० ; G4. Om. वेदसिद्धेन
29d) G4. Om.
29) T2. Om.
30b) D3,D4,D5,D6,G,G1,G2,G3, G4,G5,G7,M,M1,M2,T,T1. } ०तान्तरम्। for ०तोत्तमम्।
G6. Om. देवतोत्तमम्।

देवतान्तरभक्तानां न साक्षात् परमा गतिः ॥ ३० ॥
महादेवैकभक्तानामचिरात् परमा गतिः ।
महादेवैकभक्तोऽपि विष्णुं वा देवतान्तरम् ॥ ३१ ॥
अवमानं न कुर्वीत श्रेयस्कामश्च बुद्धिमान् ।
युगदोषेण पापेन ब्रह्मविष्णुमहेश्वरान् ॥ ३२ ॥
पुरन्दरादिदेवांश्च ब्रह्मन्! निन्दन्ति मानवाः ।

30c) M. Om. दे
D6. वेदवादपरिभ्रष्टः for देवतान्तरभक्तानाम्
30d) D6. प्रायश्चित्तेऽप्यनुन्मुखः ॥ for न साक्षात् परमा गतिः ॥
30cd) G6 Om.
30) T2. Om.
31a) T1. ०वेश० for ०वैक०
D6. नरो मरणभीत्या यः for महादेवैकभक्तानाम्
31b) T1. साक्षादेव परा for अचिरात् परमा
D6. तन्त्रेणाराधयेद्धरम् । for अचिरात् परमा गतिः ।
31ab) D,D1,D2,D5,G,G1,G2,G3, G4,G5,G6,G7,M,M1,M2,T. } Om.
31c) D5. Om. महादेवैकभ ;
D. ०क्तानाम् for ०क्तोऽपि
D6. विष्णु ब्रह्माणमन्य च for महादेवैकभक्तोऽपि
31d) D6. नरस्तन्त्रोक्तवर्त्मना ॥ for विष्णु वा देवतान्तरम् ॥
31) T2. Om.
32a) D4. ०प० } for ०व०
D6. ०न० }
32b) M1. Om. य
D. ०स्कामी च } for ०स्कामश्च ; G6. Om. मश्च
D1. ०स्कर्मश्च }
D5. भक्ति० for बुद्धि०
32c) G6. Om. षेण पापेन ;
G4. Om
32d) G6. Om.
32) T2. Om.
33a) G6. Om.
33b) G6. Om. ब्रह्मन्!

वर्जयेद्देवतानिन्दां ब्रह्मविज्ञानदूषणम् ॥ ३३ ॥
श्रुतिस्मृतिपुराणानां निन्दामपि च सत्तम! ।
ब्रह्मविज्ञानिनां निन्दां शान्त्यादीनां च दूषणम् ॥ ३४ ॥
यज्ञदानादिनिन्दां च प्रयत्नेन विवर्जयेत् ।
नित्यकर्मण्युपेक्षां च कलञ्जादेश्च भक्षणम् ॥ ३५ ॥
सन्ध्याकाले च निद्रां च प्रयत्नेन विवर्जयेत् ।
श्रुतिस्मृतिपुराणेषु विहितं सम्यगाचरेत् ॥ ३६ ॥

33c) M1. Om. र्जं ; G4 ०ना च for ०निन्दाम्
33cd) D4. Reads in prose order in place of verses No. 33cd to 35. See under footnotes to verse No 35 below.
33) T2. Om.
34b) G3,G4. निष्ठा० for निन्दा० ; M1,T1. यत्नतः। for सत्तम!
34c) G4. Om. ना निन्दाम् ; M1. ०नों for ०नाम्
G6. Om. विज्ञानिना निन्दाम्
34d) M1. Om. दीना च ; G4. Om. शान्त्यादीना च दूष
G6. Om.
34) D4,M,T2. Om.
35a) G6. Om.
35b) G6. Om. प्र
D,D3,D5,D6,G3,G4,G6,G7,M1,M2. ०नैव for ०न वि०
35c) M1. Om. ण्यु
35d) T1. ०स्तु for ०श्च
35cd) G3,G4. Om.
35) M,T2. Om.
D4. Reads in prose order in place of verses No. 33cd - 35 as follows :
देवनिन्दाम् ० ब्रह्मज्ञान ० श्रुतिस्मृतिपुराण ० ज्ञानि ० शान्त्यादि ० यज्ञदानादि ० च न निन्देत्। नित्यकर्मण्युपेक्षा च कलञ्जादेश्च भक्षणम्। सन्ध्याया निद्रा वर्जयेत्।
36a) M1,M2,T1. ०षु for च. the first ; G6,M1. Om. निद्रा च
36b) M1 Om. प्र ; D3,D5,M1,M2. ०नैव for ०न वि०
G6. Om.
36ab) G3. Om.
36c) G6. Om.
36d) G6. Om. विहित स
36cd) M Om.
36) G4,T2. Om.

निषिद्धं सकलं शश्वत् प्रयत्नेन विवर्जयेत् ।
यस्य सत्त्वगुणस्तस्य सर्वं सिद्धयत्ययत्नतः ॥ ३७ ॥
रजसा तमसाक्रान्तः संसारे परिवर्तते ॥

॥ इति श्रीस्कान्दे पुराणे सौरसंहितायां दशमोऽध्यायः ॥

37a) M1. Om. निवि ; M1,M2T1. नित्यम् for शश्वत्

37b) D5,G3,M2. ०नैव for ०न वि० ; M1. Om. यत्नेन विव

37ab) G4,M. Om.

37c) G,G2,G5,T,T1. ०त्त्वम् } for ०त्त्व० ; M1. Om. यस्य सत्त्वगुण
G1. ०त्यम् }

D,G4,M,M1,M2,T1. सर्वम् } for तस्य
D3,D4,D5,D6,G3. सर्वः }

37d) D,D3,D4,D5,D6,G3,G4,T1. तस्य for सर्वम् ; T1. Om. सि ; G6. Om. ध्यत्यय-

38a) M. Om. रजसा

D5 ०का० } for ०क्रा०
D5 ०श्रा० }

38ab) G6,T2. Om.

Colophon :

M1,M2. इति
D3,G1,G2,G3G7,T1. इति स्कान्दे
T. इति श्रीस्कान्दे
D1 इति श्रीस्कन्दे महापुराणे
D2,G. इति श्रीस्कान्दे महापुराणे
G5 इति स्कान्दे महापुराणे
D6,G4,G6. इति महापुराणे श्रीस्कान्दे
D,D4,D5. इत्यादिमहापुराणे स्कान्दे
} for इति श्रीस्कान्दे पुराणे

D6. सूर० for सौर० ; M1.Om. सौरसहितायाम्

D5. नवमो० for दशमो० ; T2. Om.

॥ अथ एकादशोऽध्यायः ॥

श्रीभगवानुवाच

अथातः सम्प्रवक्ष्यामि समासेन न विस्तरात् ।
गुणानां च स्वभावं ते यज्ज्ञात्वा पूयते नरः ॥ १ ॥
सत्त्वं रजस्तम इति गुणा मायासमुद्भवाः ।
मायाकार्येषु सर्वेषु ते गच्छन्ति मुनीश्वर ! ॥ २ ॥

Before1a)	D4,G1,G6,M,T	श्रीभगवान् -
	D,M2.	भगवान् - } for श्रीभगवानुवाच-
	D5.	रविः -
	G2,G4,G5,T2.	Om श्रीभगवानुवाच -
1a)	D3,D5,G3,G4,M,M2.	०हम् for ०तः ; M1. Om. त. मम्र
1b)	T1.	तु for न, the second
	M.	तवाह करुणाबलात्। for ममासेन न विस्तरात्।
	D6.	Om. न, the second.
1ab)	D4,G6.	Om.
1c)	G6.	Om. गुणानाम् , D4. महागुण० for गुणाना च
	D.	प्रभावस्ते } for स्वभाव ते
	D6.	प्रभाव ते } for स्वभाव ते
	T1.	स्वभावेन } for स्वभाव ते
1d)	D4.	०ज्ञूणा स्नू० for ०ज्ज्ञात्वा पू०
	D5.	०यात् for ०त्वा
1)	T2.	Om.
2b)	D3,D4,D5,D6,G3,G4,G6,G7,M,M2,T1.	०हृताः। } for द्भवाः।
	G2,G5.	०त्रताः। } for द्भवाः।
	M1.	Om. द्भवा।
2c)	G4.	०र्यात्मकार्ये० for ०र्येषु सर्वे० ;
	G3	वस्तु० for सर्वे०
	D3	रजसा पापकार्येषु for मायाकार्येषु सर्वेषु
2d)	D3.	गच्छतीति for ते गच्छन्ति :
	D5.	०न्तमती० for ०न्ति मुनी०
	D6,G,G1,G2,G4,T,T1.	०रा। for ०र!
2cd)	G6.	Om.
2)	T2.	Om.

सत्त्वं नानाविधं विद्धन्! रजो नानाविधं भवेत् ।
तमो नानाविधं सर्वव्यवहारस्य सिद्धये ॥ ३ ॥

रजसा तमसा मिश्रं भवेत् सत्त्वं कदाचन ।
रजः सत्त्वेन चन्येन तमस्ताभ्यां तथा भवेत् ॥ ४ ॥

सत्त्वसंज्ञो गुणस्तेषामुत्तमस्तु रजोगुणः ।
मध्यमस्तु तमश्चान्यः सङ्ग्रहेण मयेरितम् ॥ ५ ॥

सत्त्वात् सञ्जायते शौक्ल्यं विज्ञानं सर्वमास्तिक! ।
रागो दुःखं च दुर्ज्ञानं जायते च रजोगुणात् ॥ ६ ॥

3a)	D5.	गुणा - नाविधा for सत्त्व नानाविधम्
	T1	ब्रह्मन्! for विद्धन्! ; G6.Om.
3b)	G4.	Om. नानाविधम्
	D5	व्यवहारस्य सिद्धये। for रजो नानाविध भवेत्।
3c)	D,D3,D4,D6,G3,G4,G6,G7,T1.	०र्वम् for ०र्व० ; M1. Om. ध स
3d)	T1	शु० for सि०
3cd)	D5.	Om.
3)	T2.	Om.
4b)	G6.	Om. वेत् सत्त्व कदाचन।
	M.	उत्तमस्तु रजोगुण'। for भवेत् सत्त्व कदाचन।
4c)	D.	Om. चान्येन
4cd)	G6,M.	Om.
4)	T2.	Om
5a)	G4.	Om. सज्ञो
5b)	M.	Om.
5c)	D6.	०न तु for ०मस्तु ; T1. ०स्त्वधम० for ०स्तु तम०
	D.	०म' प्रोक्तः for ०मश्चान्यः
	G,G1,G2,G5,G6,G7.	०न्यत् for ०न्यः
5d)	G4.	Om. ग्रहेण मयेरितम्॥ ; G6 Om. रितम्॥
5)	T2	Om.
6a)	G.	०क्लम् } for ०क्लचम्
	G7.	०र्यम् }
6b)	M1.	Om. विज्ञान स
	D,D3,D4,D5,D6,G3,G4,M,M2,T1.	सुख० for सर्व०
6ab)	G6.	Om.
6c)	D.	रोषो for रागो ; G3,G4 ०र्ज्ञेयम् for ०र्ज्ञानम्
	G5.	तथा ज्ञा० for च दुर्ज्ञा० ; G6. Om.
6d)	G6.	Om. जा ; G4. ०न्ते for ०ते
6)	T2.	Om.

मोहनं च प्रमादश्च तथा निद्रा तमोगुणात् ।
ज्ञानश्रद्धा मुने! सत्त्वात् कर्मश्रद्धा तमो गुणात् ॥ ७ ॥
जायते चोभयश्रद्धा नराणां च रजोगुणात् ।
वेदमार्गरतिः सत्त्वात् तन्त्रश्रद्धा तमोगुणात् ॥ ८ ॥
उभयत्र रतिर्नृणां जायते च रजोगुणात् ।
सत्त्वात् त्रैवर्णिकत्वं स्याद्रजसा शूद्रता भवेत् ॥ ९ ॥
तमसा सङ्करत्वं स्यान्मुने! योगीन्द्रवन्दित! ।
सत्त्वात् सञ्जायते विप्रो रजसा भूपतिर्भवेत् ॥ १० ॥

7a)	D2,G3.	०सा० } for ०मा०
	G4.	०मो० }
7b)	D5.	पापम् for तथा ; D5,G7. निन्दा for निद्रा
	D.	रजो० for तमो०
7ab)	M1.	Reads between 9b and 9c See under footnotes to verse No. 9c.
7cd)	D,D1,D2,D3,D4,D5,D6,G, G1,G2,G3,G4,G5,G6,G7,T.	Om
7)	T2.	Om
8a)	M1.	Om. ते चोभयश्रद्धा
8b)	M1.	Om. न
8c)	T1.	०न. for ०तिः
8)	D,D1,D2,D3,D4,D5,D6,G,G1, G2,G3,G4,G5,G6,G7,T,T2.	Om.
9a)	M2.	म० for र०
9ab)	D,D1,D2,D3,D4,D5,D6,G,G1, G2,G3,G4,G5,G6,G7,T.	Om.
Before 9c)		
	M1	Adds मोहन च प्रमादश्च तथा निद्रा तमोगुणात्। (See 7ab above) ,
	M2	Repeats verse No. 7ab.
9c)	G6.	Om सत्त्वात् त्रैव
9d)	D6.	रु० for शू०
9)	T2.	Om.
10a)	G4.	Om. तमसा स and र
10d)	D1,D2.	नृ० for भू०
10)	T2.	Om

तमसा जायते वैश्यः सत्यमेव मयेरितम् ।
नैष्ठिकब्रह्मचर्ये च प्रव्रज्यायां तथैव च ॥ ११ ॥
वानप्रस्थेऽग्निहीने च श्रद्धा सत्त्वाद्विजायते ।
भार्याग्निसंयुते सत्त्वाद्वानप्रस्थे रतिर्भवेत् ॥ १२ ॥
गार्हस्थ्ये रजसा बुद्धिस्तमसा ब्रह्मचर्यके ।
प्रणवस्य जपे श्रद्धा सत्त्वादेव विजायते ॥ १३ ॥
सावित्र्या रजसान्येन व्याहृत्याश्च जपे रतिः ।
सर्वत्र सुखबुद्धेश्च हेतुः सत्त्वगुणस्तथा ॥ १४ ॥

11c)	M2.	०ण for च, the second.
11d)	T1.	ब्रह्म० for प्रव्र०
11)	T2.	Om.
12a)	D.	निर्हीने }
	D4.	गृहस्थे } for ०ऽग्निहीने
	T1.	यतित्वे }
12b)	D.	शुद्धात् }
	G4.	श्राद्ध } for श्रद्धा ; G4. Om. त्त्वाद्विजा
12ab)	D5.	Om.
12c)	T1.	धा० for भा० ; M,M1. ०दि० for ०ग्नि०
	D1,D2,G,G1,G7.	०साधुते }
	T.	०सहिते } for ०सयुते ; M1 Om. ते स
12d)	D5.	०च्छिवार्चायाम् for ०द्धानप्रस्थे
	D.	मति० }
	G2,G5.	रुचि० } for रति०
12)	T2.	Om.
13a)	T1.	जायते for रजसा
13c)	D5,D6,G,G1,G3,G4,G6,G7,M,M1,M2,T,T1.	०प० for ०पे
13d)	D1,D2	हि for वि० ; M1. Om. य
13)	T2.	Om.
14a)	G3.	०ख्ये० for ०न्ये० ;
	G7.	Om. न्येन
14c)	G4.	०सश्च for ०र्वत्र and om. सबुद्धेश्च
14d)	G6.	Om. सत्त्वगुणस्तथा॥ ; G4. Om.
14cd)	D4.	Reads in prose order in place of verses No. 14cd - 16. See under footnotes to verse No. 16 below.
14)	T2.	Om.

सर्वत्र दुःखबुद्धेश्च हेतुः साक्षाद्रजोगुणः ।
सर्वत्र मोहबुद्धेश्च हेतुः साक्षात् तमोगुणः ॥ १५ ॥
सर्वं जगदिदं विद्वन्! गुणत्रयविजृम्भितम् ।
गुणत्रयवशाः सर्वे चेतना न हि संशयः ॥ १६ ॥
त्रैगुण्यविषया वेदास्तन्मूलाः स्मृतयस्तथा ।
अविशेषेण तन्त्राणि समस्तानि न संशयः ॥ १७ ॥
वेदान्ताः सकलाः साक्षान्निस्त्रैगुण्ये परात्मनि ।
तन्मूलानि पुराणानि पर्यवस्यन्ति चिद्घने ॥ १८ ॥

15a)	G3.	सु० for दु० ; G4,G6. Om.
15b)	G6.	Om. हेतु :
	M1.	Om. हेतुः सा ; G4. Om. हेतुः साक्षा
15c)	D5.	०मोहन० for ०त्र मोह०
	D.	मोहनादिषु सर्वत्र for सर्वत्र मोहबुद्धेश्च
15d)	D.	तमोहेतुर्भवद्गुण ॥ for हेतु साक्षात् तमोगुण ॥
15cd)	G3,G4,G6,G7,M,M1,M2.	Om.
15)	D4,T2.	Om.
16a)	T1	ब्रह्मन्! for विद्वन्!
16c)	D,D6,G,G1,G6,G7,M2.	०शात् for ०शाः
16d)	M1.	Om. सशय. ॥
16)	D4,T2	Om. ; D4. Reads in prose order in place of verses 14cd - 16 as follows · सर्वत्र सुखबुद्धे हेतु. सत्त्वम्। दुःखबुद्धे रज ·। मोहबुद्धेस्तम.। गुणत्रयवशाः सर्वे चेतनाः।
17a)	M1.	Om. त्रै
17b)	G6	त० for स्मृ०
17c)	M1.	Om तन्त्रा
17)	G4,T2.	Om. ; G4. Reads this verse after 19a below (See footnotes to 19a below.)
18a)	M1.	Om. वेदा
18b)	M.	०दत्रै० for ०न्निस्त्रै० ; M1. Om. न्नि
	D.G2,G5,M1.	०ण्य० for ०ण्ये
18c)	G3,M,M1,M2.	०त्फ० for ०न्मू०
18d)	G5.	चेत० for चिद्घ०
18)	T2.	Om.

सत्त्वमात्मतया नित्यं गुणं यो मनुते हरः ।
स सर्वत्र सुखे तिष्ठन् वस्तुन्युपकरोति वै ॥ १९ ॥
मनुते चात्मना नित्यं यो हरिस्तु तमोगुणम् ।
मोहवस्तुनि सर्वत्र तिष्ठन्नुपकरोति सः ॥ २० ॥
यो नित्यं मनुते ब्रह्मा स्वात्मनैव रजोगुणम् ।
दुःखवस्तुनि सर्वत्र तिष्ठन्नुपकरोति सः ॥ २१ ॥
रुद्रस्तमोगुणेनैव स्वाधिष्ठेयेन सत्तम! ।

19a)	D.	०त्य० for ०त्त्व० ; G4. Reads - त्रैगुण्यविषया वेदास्तन्मूलाः स्मृतयस्तथा। अविशेषेण तन्त्राणि समस्तानि न संशयः ॥ (Verse No. 17 above.)
19b)	D5.G4,M,M2.	न० for ह०
19c)	G7.	Om. स ; M1. Om. स सर्व ; T1. गुणे for सुखे
19d)	D,D4,D5.	०स्तू० for ०स्तु०
19)	G3,T2.	Om.
20a)	M1,M2,T1.	स्वा० for चा०
20b)	M.	०श्च for ०स्तु
	D5	०तो० for ०मो० and ०णः। for ०णम्।
	G4.	Om तमोगुणम्।
20c)	D1	दु ख० for मोह०
20d)	D5,D6.	०त्यु for. ०न्नु०
	D	हि ॥ } for स. ॥ ;
	D5	च ॥ } for स. ॥ ;
	G6.	सा ॥ } for स. ॥ ;
	G7	वै ॥ } for स. ॥ ;
	M1	Om. क and ति
20)	G3,T2.	Om.
21b)	D	०ण.। for ०णम्।
21c)	D5.	Om. च and ०स्तू० for ०स्तु०
21d)	D5.	०ष्ठत्यु० for ०ष्ठन्नु० ;
	D1,D2	हि॥ for सः॥
21)	G3,M,M2,T2.	Om.
22b)	D.	चास्तिक! for सत्तम!

तिष्ठन् सर्वत्र संहारे सदैवोपकरोति वै ॥ २२ ॥
स्वाधिष्ठेयेन सत्त्वेन विष्णुः सर्वत्र संस्थितः ।
पालकः सर्ववस्तूनां ब्रह्मन्! उपकरोति वै ॥ २३ ॥
रजसा स्वात्मभूतेन स्वाधिष्ठेयेन चास्तिक! ।
तिष्ठन् सर्वत्र सर्वेषां स्रष्टा उपकरोत्यजः ॥ २४ ॥
त्रिमूर्तीनां तु यः कर्ता निस्त्रैगुण्यस्त्रिलोचनः ।
नीलकण्ठो निराधारः शिवः सोमकलाधरः ॥ २५ ॥
सृष्टिस्थित्यन्तकार्येषु सर्वेषूपकरोति वै ।

22c) D. सर्वेषाम् } for सहारे
M,M2. ससारे }
22d) D. सृष्ट्वा उ for सदैवो॰ ; G3. Om. सदैवोप
D. ॰त्यजः॥ for ॰ति वै॥
D1,D2,T. हि॥ }
G2,G5. वा॥ } for वै॥
T1. सः॥ }
22) G3,T2. Om.
23a) M1. सा॰ for स्वा॰
23b) M1. Om. स ; G4 भृ॰ for ॰स्थि॰
23c) M. ॰जन्तू॰ } for ॰वस्तू॰
T1. ॰भूता॰ }
23) D,G3,G7,T2. Om.
24c) M1. Om. षाम्
24d) M1. Om. स्र
D1,D2,D3,D4,D5,D6,G1,G2,G4,G6,G7. सृष्टावु॰ for स्रष्टा उ॰
24) G3,T2. Om.
25a) G4. Om. त्रिमूर्तीना तु ;
D. कश्चित् for कर्ता
25d) D5,M. सोमः for शिव.
24) G3,T2. Om
26a) M1. Om. त्यन्तकार्येषु
26b) M1 Om. स
D1,D2,G,G1,G2,G5,T. हि। for वै।

निस्त्रैगुण्ये परे तत्त्वे साम्बमूर्त्युपलक्षिते ॥ २६ ॥
स्वात्मभूते मतिर्येषां तेषामेव परा गतिः ।
त्रैगुण्यविषयो नाम संसारे परिवर्तते ॥ २७ ॥
विधयश्च निषेधाश्च त्रैगुण्यवशवर्तिनः ।
त्रिगुणप्रभवं तत्त्वं सर्वदुर्घटकारणम् ॥ २८ ॥
श्रुतिस्मृतिपुराणेषु जडत्वेन प्रकीर्त्यते ।
जडरूपमपि ब्रह्मन्! चित्सम्बन्धात् क्वचित् क्वचित् ॥ २९ ॥

26c)	D.	०ण्यः for ०ण्ये
26d)	D2.	०म्बे मृत्यू० for ०म्बमूर्त्यु०
	G7.	०तौ परात्मनि ॥ for ०र्त्युपलक्षिते ॥
26)	G3,T2.	Om.
27a)	G4.	Om. षाम्
27b)	G4.	Om तेषा ; M1. Om. तिः।
27c)	D,D1,D2,D6,G,G1,G2, G5,G6,G7,M,T,T1.	०ये for ०यो
	G2,G5.	कामः for नाम
	T1.	मानम् for नाम
27)	G3,T2.	Om.
28a)	D1,G1,G4.	०ष० for ०ध०
	G5.	०धे० for ०ध०
	D1.	०षिद्धा० for ०षधा० ; G5. ०ध० for ०धा०
28b)	D1.	सर्वे त्रैगुण्य० for त्रैगुण्यवश० ; D2. Om वश
28c)	D5.	त्रैगुण्यविषयम् for त्रिगुणप्रभवम्
	M,M2.	सर्वम् for तत्त्वम्
	M1.	सत्त्वम् for तत्त्वम्
28d)	D,D4.	०र्वम् for ०र्व०
28)	G3,T2.	Om.
29b)	D5.	०ग० for ०ड० ; G4. Om. जड
	G1,G6.	०र्ति० for ०र्त्य०
29c)	G4.	Om. जडरूप ;
	D.	०मिदम् for ०मपि
	D,D6,G6,G7,M.	०ह्म for ०ह्मन्!
29d)	G5.	०त्सम तु for ०त्सबन्धात् ; G6. Om. धात्
	G7.	०न्धबलात् for ०न्धात् क्वचित्
29)	G3,T2.	Om.

प्रोच्यते चेतनत्वेन तद्धि संसारकारणम् ।
तदेव सर्वशास्त्रेषु मायेति परिकीर्त्यते ॥ ३० ॥

अन्यथाभावहेतुत्वाद्विद्यानाश्यत्वकारणात् ।
अविद्येति तिरस्कारात् तमःशब्देन भण्यते ॥ ३१ ॥

मोहहेतुत्वतो मोहः सद्वैलक्षण्यतो ह्यसत् ।
कार्यकल्प्यत्वरूपेण शक्तिरित्यभिधीयते ॥ ३२ ॥

व्यक्ततताभावतोऽव्यक्तं कारणं कार्यहेतुतः ।
व्योमहेतुतया व्योम परं कार्यात् परत्वतः ॥ ३३ ॥

परमात्मैक्यतः प्रोक्तः परमात्मेति सत्तम! ।

30a) T. प्रावृ for प्रोच्य० ; T1. तेन तन्त्वे० for चेतनत्वे०
30c) T1. ०कार्ये० for ०शास्त्रे०
30d) D. पुसा ये for मायेति ; D1. ०र्ति० for ०र्त्य०
30) G3,T2. Om.
31a) M. ०ग० for ०न०
31b) G4. Om. द्धि ; ०द्यज्ञान० for ०द्यानाश्य० and om. त्वकार
M1. Om. श्यत्वकारणा
31d) G4. Om. तमःशब्देन भ ; D5,D6. ग० for भ०
31) G3,T2. Om.
32a) D. तत् पुनर्मोहहेतुत्वात् for मोहहेतुत्वतो मोहः
32b) D5. Om. ण्य ; M1. Om. ह्य ; D1,D2. ०प्य० for ०ह्य
32c) D,D5,M2. ०ल्पत्व० } for ०ल्प्यत्व०
D3,D4,G4. ०ल्पित० }
32d) T1. ०त्युच्यते सदा ॥ for ०त्यभिधीयते ॥
32) G3,T2 Om
33a) D,D6. ०क्ति० for ०क्त० ;
G2,G5,M. ०क्त० for ०क्तम्
33d) D,D3. ०रः } for ०रम् , T1. ०र परः ॥ for ०रत्वतः
G,G6,G7. ०र० }
33) G3,T2. Om.
34a) D6,M1. ०र्थे० for ०त्मै० ; D5. ०क० for ०क्य०
D4,D5,M1,M2,T1. ०क्तम् for ०क्त. ; G4 Om. प्रोक्त
34b) D5. परिमात्यन्ति for परमात्मेति

सर्वाधारतयाधारः पाशो बन्धस्य हेतुतः ॥ ३४ ॥
आत्मनोऽणुत्वहेतुत्वादणुर्मालिन्यतो मलम् ।
गुहासंवरणेनैव व्यापित्वाद्विष्णुरास्तिक! ॥ ३५ ॥
आकारैरपरैरेतद्बहुधा परिकीर्त्यते ।
अस्य नामान्यनन्तानि तानि वर्णयितुं मया ॥ ३६ ॥
न शक्यानि मुनिश्रेष्ठ! कल्पकोटिशतैरपि ।
अथ किं बहुनोक्तेन तेन तज्ज्ञैर्गुणैस्त्रिभिः ॥ ३७ ॥

34c)	M1.	Om. धारः
34d)	D.	०श० for शो ; G7. पशो for पाशो
	D,G5	०बद्ध०
	G2.	०बन्धो० } for बन्ध० ; M1. Om. पाशो बन्ध
	D6.	बध्य०
34)	G3,T2.	Om.
35b)	D,D5,D6,G1,G6,G7,M1,T.	मा० for ०र्मा० ; G7. Om. दणुर्मा
	M1.	Om. र्मालिन्यतो मलम्।
	D,D5,D6,G4,G7,M,M2	०ल । for ०लम्।
35c)	D1.	०ह्य० } for ०हा० ; T1. ०धा० for ०व, the first.
	G6.	०ण०
	M1.	Om सवरणेनैव
35d)	D,D4,D6.	०प्पि० for ०पि ; G2,G5 ०ना० for ०रा०
	D.	०का ॥ for ०क ! ; M1 Om. व्यापित्वाद्विष्णुरा
35cd)	D5.	Om
35)	G3,T2.	Om
36a)	D1.	अ० for आ० , M2. Om रपरै
36b)	G4	Om. बहुधा परि ; D1. ०र्ति० for ०र्त्य०
36c)	D1.	०य० for अ० ;
	D3,D4,D6,G.	०स्या० for ०स्य०
	D6.	०रा० for ०ना०
36d)	G4.	Om तानि
36)	D5,G3,T2.	Om.
37a)	D6.	Om. नि ; M1. Om. मुनिश्रे
37c)	D4.	बहुधा परिकीर्त्यन्ते for अथ किं बहुनोक्तेन ?
37d)	D5.	स्मृतिः ॥ for ०स्त्रिभिः ॥
37cd)	D5.	Om.
37)	G3,T2.	Om.

व्यवहारस्य सर्वस्य मुने! सिद्धिर्न संशयः ।

॥ इति श्रीस्कान्दे पुराणे सौरसंहितायामेकादशोऽध्यायः ॥

38b) G4. Om. मशयः । ; M1. Om. श

38ab) G3,T2. Om.

Colophon :

M1,M2. इति

D3,D4,G7,T1 इति स्कान्दे

G. इति श्रीस्कान्दे

D1. इति श्रीस्कन्दे महापुराणे

D,D2. इति श्रीस्कान्दे महापुराणे

D5,G2,G5,G7. इत्यादिमहापुराणे स्कान्दे

D6,G1,G4,G6,T. इत्यादिमहापुराणे श्रीस्कान्दे

} for इति श्रीस्कान्दे पुराणे

D6. सूर्य० for सौर०

D. Adds सूर्ययाज्ञवल्क्यसंवादे गुणत्रयनिरूपणं नाम after संहितायाम् and before एकादशो

D1,D2 Adds गुणवैषम्यवैभववर्णनं नाम

D5. Adds गुणवैषम्यं नाम

D6,G,G1,G2,G4,G5,G6,G7,T. Adds गुणवैषम्यवैभवो नाम

} after ०संहितायाम् and before एकादशो०

D4,D5. दशमो० for एकादशो० ; G3,T2. Om.

॥ अथ द्वादशोऽध्यायः ॥

श्रीभगवानुवाच

अथ गुह्यतमं वक्ष्ये तवाहं करुणाबलात् ।
शृणु तच्छ्रद्धया सार्धं मुने! योगीन्द्रवन्दित! ॥ १ ॥
अस्ति देहेन्द्रियादिभ्यः पुमान् जीवसमाह्वयः ।
विभिन्नः फलभोक्ता च स्थिरः कर्ता च कर्मणाम् ॥ २ ॥
अविद्योपाधिकः सोऽयं प्रथमं तावदास्तिक! ।
तस्मिन्नेव स्थिता सूक्ष्मा वासना कर्मणामपि ॥ ३ ॥

Before1a) D5. रविः - / श्रीभगवान् - / भगवानुवाच - } for श्रीभगवानुवाच-
G3,M,M2,T. (श्रीभगवान् -)
D3,D6,M1. (भगवानुवाच -)
T2. Om. श्रीभगवानुवाच -

1a) D5. ०ति० / M2. ०स्ति० } for ०थ ; D6. Om. अ

1b) D5. शृणु भक्त्या महामुने। for तवाहं करुणाबलात्। ; D4. Om.

1c) G,G2,G5,G6,M,T1. ०णुत श्र० for ०णु तच्छ्रु०

1d) M1. Om. मु ; G6. Om. गीन्द्रवन्दि

1cd) D4,D5. Om.

1) T2. Om.

2a) D. अस्मिन् / M,M1 अस्मि } for अस्ति ; G4. Om. अस्ति देहे

2c) M2,T,T1. ०त्र० for ०त्र॑ ; D1 भक्त० for फल०

2d) T,T1. ०र० for ०र॑

M. वासनाकर्मणामपि॥ for स्थिरः कर्ता च कर्मणाम्॥

D5. Om.

2) T2. Om.

3a) D1. आ० for अ० ; M1. Om. वि ;

D5. ०पः for ०कः

3b) D4. ०दुच्यते। for ०दास्तिक!

3c) D3,D4,G1,G3. अ० for त० ; D. ०त्र० for ०त्रे०

G6. Om. त्रेव स्थिता ;

D5,M1. ०ताः for ०ता

3) M,T2. Om.

बाह्यान्तःकरणप्राणवासनाश्च तथैव च ।
शब्दस्पर्शादिभूतांशाः सुसूक्ष्मा अपि सत्तम! ॥ ४ ॥
ताभिर्वैतस्य सम्बन्धः कालस्यापि विपाकतः ।
कर्मणां परिपाकश्च भवेत् कर्मविपाकतः ॥ ५ ॥
मायोपाधिकचिद्रूपः सर्वज्ञत्वादिलक्षणः ।
ईश्वरस्तु जगत्सृष्टिस्थितिनाशान् करोति वै ॥ ६ ॥

4a) D6. ०णा for ०ण०

4b) D5,G3,M. च for श्च ; M1. Om. तथैव ;
G4. Om. व च।

4c) D5. ०तानाम् for ०ताशाः ; G4. Om.

4d) G1. Om. सु ; G4. Om. सुसूक्ष्मा
M. सूक्ष्मा अपि च for सुसूक्ष्मा अपि

4) T2. Om.

5a) D,D4,D5,D6,G,G1,G2,G4,G5,G6,T. तया वै०
D1,D2,M,M1,M2. तया चै०
G7. ... चै०
T1. तथा चै०
} for ताभिर्वै०

D1,D2. ०तन्य० for ०तस्य

5b) D5. तस्य काल०
D,D1,D2,D3,D6,G,G1,G2,G5,G7,M,M1,M2,T,T1. कालस्तस्य
G3. काल...
G6. काल - स्य
} for कालस्यापि

5c) D6. ०काश्च for ०कश्च ;

T1. ०त्वात् for ०श्च

5d) G3. ०भाग० for ०पाक० ; M1. Om. तू कर्मविपाक

5cd) M. Om.

5) T2. Om.

6c) M. ०र. स for ०रस्तु

6d) D1,D2,G,G6,G7,T. ०नाशकरो हि वै ॥
D3,D4,G3. ०नाशकरो भवेत् ॥
D5,G2,G5,M,M1,M2. ०नाश करोति वै ॥
G1. ०नाश करोति हि ॥
} for ०नाशान् करोति वै ॥

G4 Om. करोति वै ॥

6) T2. Om.

प्राणिकर्मानुगुण्येन जगत्सृष्टिं करोति यः ।
तस्य सर्गस्थितिध्वंसा लीलारूपा हि केवलम् ॥ ७ ॥
स्वस्वकर्मानुगुण्येन जीवा लोके हि सत्तम! ।
ईश्वरस्याज्ञया स्थूलशरीरं प्राप्नुवन्ति च ॥ ८ ॥
देहाद्देहान्तरप्राप्तौ जीवसंज्ञः पुमानसौ ।
वासनाभिः परिष्वक्तो गच्छत्यज्ञानमोहितः ॥ ९ ॥
यावज्ज्ञानोदयस्तावद्बाह्यान्तःकरणानि च ।
भूतसूक्ष्मांशकाः प्राणाः सह गच्छन्ति तेन वै ॥ १० ॥

7b)	D5.	शरीराणि for जगत्सृष्टिम् ; M1. Om. रो
	D5.	च। for यः।
7cd)	D5.	Om.
7)	T2.	Om.
8a)	T1.	सर्व० for स्वस्व० ; D6. ०स्ति० for ०स्व, the second.
8b)	D,D3,D4,D6,G4.	०व० for ०वा० ; D,D1,G6. ०का for ०के
	G3,G4.	त } for हि
	D6.	ति } for हि
8ab)	D5	Om.
8c)	G,M,M1,M2,T1.	०ल for ०ल०
	D5.	Om. ईश्वरस्याज्ञया and जीवो for स्थूल०
8d)	G4	०राज्ञेया....॥ for ०र प्राप्नुवन्ति च॥ ; D. हि॥ for च॥
	D5.	०देहाद्देहान्तर गतः॥ for शरीर प्राप्नुवन्ति च॥
8)	T2	Om.
9a)	D	०रप्राप्यै } for ०रप्राप्तौ
	D1,D2,T1.	०र प्राप्तो } for ०रप्राप्तौ
	G2,G5.	०रे प्राप्तौ } for ०रप्राप्तौ
	D6.	०रावाप्तौ } for ०रप्राप्तौ
9b)	D.	०रूपः for ०सज्ञ. ; G4. Om जीवसज्ञ॰पु
9ab)	D5.	Om.
9c)	D1,M.	०क्तौ for ०क्तो
9d)	D,D1.	नेच्छ० for गच्छ०
10c)	G7.	Om भूत ;
	D6.	०तं for ०त०
	D3,D4.	सूक्ष्मभूता- for भूतसूक्ष्मा-
	D3,D4,D5,G3,G4,M,M1,M2.	०कः प्राणः for ०काः प्राणाः
10d)	D3,D4,D5,G3,G4,M,M1,M2.	०ति for ०न्ति
10)	T2.	Om.

ज्ञानादूर्ध्वं न जीवस्य विद्येते हि गमागमौ ।
